X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 12

Title KRTYARATNAVALI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 12 Subject: Dharma Śāstra.

Title: Kṛtya Ratnāvalī.

Author: Bhaṭṭ Rāma Chandra Tatsat. Scribe: —

Date of the work: 1648. A.D. Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.2" by 5.2". Extent: 67 folios.

Language: Sanskrit. Script: Devanāgarī.

Remarks: Complete.

कसरलावली स्यंकै बेरुा लू जिन्। यज्ञेश्वर सुता तो। रामा। सुदत्ता

अथ विष्टिपुछविचारः॥ दशम्यां मष्टम्यां प्रथम घटिका पंचकपरं हरे धुःस

सप्तम्यो स्त्रिदेत्रो घटिकां लू त्रि घटिकं॥ तृतीयां पूर्णां यां कुनेयन परं वैत्रिघ

टिकं शुक्लं विष्टेः पुछं त्रिो वलिखि चतुर्थ्यां श्रियरविरमे॥१॥ इति भद्रा पुछ वि

चारः॥१॥

कृत्यर० ।।श्रीगणेशायनमः।। ।।नमस्कृत्यरमानाथंभट्टविठ्ठलसूनुना।। कृत्यरत्नावलीरम्यातन्य
१ तेविदुषांमुदे।।१।। चैत्रशुक्लप्रतिपदिसंवत्सरारंभविधिः।। तत्रप्रतिपदौदयिकीग्राह्या।। चै
त्रेमासिजगद्ब्रह्माससर्जप्रथमेऽहनि। शुक्लपक्षेसमग्रंतुतदासूर्योदयेसतीति।। ब्रह्मपुरा
णात्।। दिनद्वयेतद्व्याप्तौतदस्पर्शेवापूर्वैव।। संवत्सरादौवसंतादौबलिराज्येतथैवच।। पूर्ववि
द्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरितिवृद्धवसिष्ठोक्तेः।। अस्यमलमासत्वेतत्रैवसंवत्सरारंभ
।। तस्याएवसंवत्सराद्यतिथित्वात्।। अत्रतैलाभ्यंगोनित्यः।। वत्सरादौवसंतादौबलिराज्ये
तथैवच।। तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यते।। इतिवृद्धवसिष्ठोक्तेः।। अत्रैवनवरात्रारंभ
।।मलमासपातेतुउत्कर्षः।। ।।अत्रप्रदानमुक्तंभविष्ये।। अतीतेफाल्गुनेमासिप्राप्तेचै
त्रमहोत्सवे।। पुण्येऽह्निविप्रकथितेप्रपादानंसमारभेदिति।। तत्रमंत्रः।। प्रपेयंसर्वसामा शिवः
न्याभूतेभ्यःप्रतिपादिता।। अस्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाइति।। तत्रैव।। प्रत्य १

कृत्यर० चनात्सर्वानित्यकीग्राह्येत्याह।। अत्रश्राद्धमुक्तंमात्स्ये।। कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु।। हा
२ यनानांद्विसाहस्रंपितॄणांतृप्तिदंभवेदिति।। अधिकमासेपीदंकर्तव्यं।। मन्वादिकंतैथिकंचकु
र्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः।। अत्रपिंडदानंनास्ति।। तथाचकालादर्शे।। विषुवायन
संक्रांतिमन्वादिषुयुगादिषु।। विहायपिंडनिर्वापंसर्वश्राद्धंसमाचरेदिति।। एतदकरणेप्राय
श्चित्तमुक्तंकृत्यविधाने।। स्वंभुवःप्रतिमंत्रंचशतवारंजलेजपेत्।। मन्वादयोयदान्यूनाःकुरुते
७२ नैववापदीति।। एवंषण्णवतिश्राद्धान्यपिनित्यानि।। तेषामयंसंग्रहः।। अमा १२ मनु १४ युग ४
क्रांति १२ धृति १२ पात १२ महालयाः।।१५।। आन्वष्टक्यंचपूर्वेद्युःषण्णवत्योष्टकास्त्विति ।।२५।।
।। ।।चैत्रशुक्लतृतीयामत्स्यजयंती।। चैत्रशुक्लपंचमीत्वन्ये।। आषाढशुक्लैकादशीतुपरे।। इ
यंचमध्याह्नव्यापिनीग्राह्या।। इयंचतदुपासकानांनित्या।। अन्येषांकाम्याचैत्रशुक्लपंच शिव०
ना मीकल्पादिः।। अत्रस्नानादिफलम्।। अस्यामेवश्रीपूजाहेमाद्रौविष्णुधर्मोत्तरे।। चैत्रशुक्लपंच २
स्य

दंधर्मघटकोवस्त्रसंवेष्टिताननः॥ ब्राह्मणस्यगृहेदेयः शीतामलजलःशुचिः॥ तत्रमंत्रः॥ एष
धर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः॥ अस्यप्रदानात्सकलाममसंतुमनोरथाः॥ अनेनवि
धिनायस्तुधर्मकुंभंप्रयच्छति॥ प्रपादानफलंसोपिप्राप्नोतीहनसंशयंइति॥ चैत्रशुक्लतृतीया
यांईश्वरसंयुतांगौरींसंपूज्यांदोलयेत्॥ तथाचदेवीपुराणे॥ तृतीयायांयजेद्देवींशंकरेणसम
न्विताम्॥ कुंकुमागुरुकर्पूरमणिवस्त्रसुगंधकैः॥ स्रग्गंधधूपदीपैश्च दमनेनविशेषतः॥ आं
दोलयेत्ततोवत्सशिवोमातुष्टयेसदा॥ रात्रौजागरणंकार्यंप्रातर्देयाचदक्षिणा॥ हेमवस्त्रान्न
पानादितांबूलानिस्रजस्तथेति॥ मूर्त्तिस्वरूपमुक्तंदेवीपुराणे॥ सौवर्णीतुउमाकार्याराजतस्तुह
२ स्मृ रस्तथा॥ चतुर्भुजं देवेशोद्विभुजातुउमाभवेदिति॥ इयंमुहूर्त्तमात्रापिपराग्राह्या॥ गौरी
हेवत्सलात्॥ इयंचमन्वादिः॥ शुक्लपक्षगतत्वात्कुतुपपूर्वार्द्धव्यापिनीग्राह्या॥ हेमाद्रिस्तु॥ पू
र्वाह्णिकास्तुसदाग्राह्याशुक्लामनुयुगादयः॥ दैवेकर्मणिपित्र्येचकृष्णेचैवापराह्णिके॥ इतिगालवव

म्यांपूजयित्वातथाश्रियम्॥ सकृद्देवाप्नुयाद्रेतत्फलंसंवत्सरोद्भवमिति॥ चैत्रशुक्लाष्टम्यांभवा
न्याउत्पत्तिः॥ तत्रभवानीयात्रोक्ताकाशीखंडे॥ भवानींयस्तुपश्येतशुक्लाष्टम्यांमधौनरः॥ न
जातुशोकंलभतेसदानंदमयोभवेदिति॥ अत्रैवअशोककलिकाप्राशनमुक्तंलैंगे॥ अशोक
शोककलिकाश्चाष्टौयेपिबंतिपुनर्वसौ॥ चैत्रेमासिसिताष्टम्यांनतेशोकमवाप्नुयुः॥ पुनर्वसु
योगोनावश्यकः॥ किंतुप्राशस्त्यातिशयार्थः॥ तिथिःशरीरंदेवस्यतिथौनक्षत्रमाश्रितम्॥
तस्मात्तिथिंप्रशंसंतिननक्षत्रंतिथिंविनेतिज्योतिःशास्त्रात्॥ प्राशनमंत्रस्तु॥ त्वमशोकहरा
भीष्टमधुमाससमुद्भव॥ पिबामिशोकसंतप्तोमामशोकंसदाकुर्विति॥ विष्णुः॥ पुनर्वसुक
बुधोपेताचैत्रेमासिसिताष्टमी॥ प्रातस्तुविधिनास्नात्वावाजपेयफलंलभेदिति॥ ॥चैत्रशुक्ल
नवमीरामनवमी॥ सात्वमध्याह्नयोगिनीग्राह्या॥ अगस्त्यसंहितायाम्॥ चैत्रशुद्धेतुनव
मीपुनर्वसुयुतायदि॥ सैवमध्याह्नयोगेनमहापुण्यतमाभवेदिति॥ दिनद्वयेतादृशीचेत्तु

कृत्यर०
३

नवसुयुताग्राह्या।ताद्दग्रूपपिदिनद्वयेचेत्तदापराग्राह्या।।नवमीचाष्टमीविद्धात्याज्याविष्णुपरा
यणैरित्यगस्त्यसंहितावचनात्।।इयंचतदुपासकानांनित्याकाम्यातुसर्वेषांभवतीन्यत्रविस्त
रः।।अत्रमध्याह्नेपूजारात्रौजागरणंपरेद्युःप्रातःपायसहोमब्राह्मणभोजनपारणादिचेति
दिनद्वयात्मकव्रतंकर्तव्यं।।इयंमलमासेनकार्या।।स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइ
तिवचनात्।।संकल्पमंत्रः।।उपोष्यनवमींत्वद्ययामेष्वष्टसुराघव।।तेनप्रीतोभवत्वंभोःसंसार
त्राहिमांहरेइतिअर्घ्यमंत्रस्तु।। दशाननवधार्थायधर्मसंरक्षणायच।।राक्षसानांविनाशाय
दैत्यानांनिधनायच।। परित्राणायसाधूनांजातोरामःस्वयंहरिः।। गृहाणार्घ्यंमयादत्तंभ्रात
भिःसहितोनघेति।।प्रतिमादानमंत्रस्तु।।इमांस्वर्णमयींरामप्रतिमांसमलंकृतां।।चित्रव
स्त्रयुगच्छन्नांरामोहंराघवायते।।श्रीरामप्रीतयेदास्येतुष्टोभवतुराघवः।।इतिदत्वाविधानेन
दद्याद्दक्षिणांभुवं।।ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयइति।।चैत्रशुक्लैकादश्यांदोलो

शिव०
३

त्सवःकौस्तुभे।।चैत्रमासस्यशुक्लायामेकादश्यांतुवैष्णवैः।।आंदोलनीयोदेवेशःसलक्ष्मीको
महोत्सवैरिति।।चैत्रशुक्लद्वादश्यांदमनोत्सवः।।बौधायनादिभिःद्वादश्यांचैत्रमासस्यशुक्ला
यांदमनोत्सवः।।बौधायनादिभिःप्रोक्तःकर्तव्यःप्रतिवत्सरमितिरामार्चने।।चंद्रिकोक्तेः।।अ
त्रपारणाहविवक्षिता।।पारणाहेनलभ्येतद्वादशीकलयापिचेत्।।तदात्रयोदशीग्राह्यापवित्रद
मनार्पणइति।।तत्रैवोक्तंनित्यंचेदं।।ऊर्जेव्रतंमधौदोलांश्रावणेतंतुपूजनं।।चैत्रेचदमनारो
पमकुर्वाणोव्रजत्यधइतिपद्मपुराणात्।।इदंशुक्रास्तादावपिकार्यं।।उपाकर्मोत्सर्जनंच
पवित्रदमनार्पणं।।ईशानस्यबलिंविष्णोःशयनंपरिवर्तनं।।कुर्याच्छुक्रस्यगुरोर्मौढ्येपिवि चे
निश्चयइतिवृद्धगार्ग्यवचनात्।। ।।चैत्रशुक्लत्रयोदश्यांमदनंचंदनात्मकं।।कृत्वासंपूज्य
यत्नेनवीजयेद्व्यजनेनच।। ततःसंक्षुधुक्षितःकामःपुत्रपौत्रसमृद्धिदइति।।१२।।चैत्रशु
क्लचतुर्दशीरात्रियोगिनीपूर्वाग्राह्या।।मधोःश्रावणमासस्यशुक्लेयातुचतुर्दशी।।सारा

त्रिव्यापिनीग्राह्येतिबोधायनवचनात्॥१३॥ ॥चैत्रीपूर्णमासीचेत्स्यात्तस्यांचित्रवस्त्रप्रदानेनसौ
भाग्यमाप्नोतीति॥ तथाब्राह्मे॥मंदेवार्केगुरौवापीवारेष्वेतेषुचैत्रकी॥ तत्राश्वमेधजंपुण्यंस्ना
नश्राद्धादिभिर्भवेत्॥ वायवीये॥ संवत्सरकृताच्चर्यायाःसाफल्यायाखिलान्सुरान्॥ दमनेना
र्चयेच्चैत्र्यांविशेषेणसदाशिवं॥इयंमन्वादिः॥ चैत्रकृष्णचतुर्दश्यांविशेषमाहपौलस्त्यः॥ चै
त्रेकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ॥नप्रेतत्वमवाप्नोतिगंगायांतुविशेषतइति॥अत्रपू
र्वाग्राह्या॥ कृष्णपक्षगतात्वात्॥ ॥इतिश्रीमन्नत्कदुपनामकभट्टरामचंद्रविरचितायांकृ
त्यरत्नावल्यांचैत्रकृत्यानि॥ ॥अथवैशाखकृत्यम्॥पाद्मे॥तीर्थेचानुदिनंस्नानंतिलैश्चपितृ
तर्प्पणं॥दानंधर्मघटादीनांमधुसूदनपूजनम्॥माधवेमासिकुर्वीतमधुसूदनतुष्टिदम्॥
॥अथवैशाखस्नानम्॥ विष्णुस्मृतिपा[illegible]योः॥तुलामकरमेषेषुप्रातःस्नानंविधीयते॥
हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति॥अत्रसौरमासग्रहः॥ अत्यदपिपक्षद्वयेपाद्मे

म्र२

॥मधुमासस्यशुक्लायामेकादश्यामुपोषितः॥पंचदश्यांचभोवीरमेषसंक्रमणेपिवा॥वैशाख
स्नाननियमंब्राह्मणानामनुज्ञया॥मधुसूदनमभ्यर्च्यकुर्यात्तंकल्पपूर्वकमिति॥वैशाखंसक
लंमासंमेषसंक्रमणेरवेः॥प्रातस्सनियमःस्नास्येप्रीयतांमधुसूदनः॥ मधुहंतुःप्रसादेनब्रा
ह्मणानामनुग्रहात्॥निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहम्॥ माधवेमेषगेभानौमुरारे
मधुसूदन॥प्रातःस्नानेनमेनाथफलदोभवपापहन्निति॥तीर्थनामापरिज्ञानेतत्रैव॥ यदा
नज्ञायतेनामतस्यतीर्थस्यभोद्विजाः॥ तत्रेसुच्चारणंकार्यंविष्णुतीर्थमिदंत्विति॥अत्रत्रिकालंवि
ष्णुपूजाकार्या॥अश्वत्थमूलेजलदानंचेत्यादितत्रैवोक्तं॥ अत्राक्तस्यत्र्यहंस्नानंपाद्मेतुक्तम्॥
त्रयोदश्यांचतुर्दश्यांवैशाख्यांचदिनत्रयं॥ अपिसम्यग्विधानेननारीवापुरुषेपिवा॥प्रातःस्ना
नि तःसुंयतःसर्वपापैःप्रमुच्यते॥यदातुवैशाखोमलमासस्तदासमाप्तिःशुद्धमासेपूर्णिमायांक
र्तव्या॥ तथा॥वैशाख्यांविधिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश॥वत्सरंसर्वपापेभ्योमुच्यतेनात्रसं

॥१

कृत्यर॰ ज्ञायइति। वैशाखशुक्लतृतीयाअक्षय्यतृतीया॥ इयंचगौरीव्रतेउत्तराकार्या॥ श्राद्धेकुतपव्या
५ पिनी॥ उदकंभ दानादावुत्तरा॥ इयंचत्रेतायुगादिः॥ भारते॥ यामन्वाद्यायुगाद्याश्चतिथयस्ता
सुमानवः॥ स्नात्वाहुत्वाचजप्त्वाचदत्वानंतफलंलभेदिति॥ केचित्तु॥ वैशाखस्यतृतीयायश्र्व
विद्धांकरोतिवै॥ हव्यंदेवानगृह्णंतिकव्यंचपितरस्तथेतिगोभिलवचनात्॥ पूर्वाह्णेतुसदाका
र्याशुक्लामनुयुगादयइति॥ वचनाच्चश्राद्धेपिपूर्वाह्णव्यापिनीउत्तराकार्येतिवदंति॥ तत्काला
सु॰ दर्शादिविरुद्धं॥ अप्युक्तंच॥ अपराह्णःपितृणांअपराह्णेतुपैतृकं [illegible] ॥ अपराह्णे
पितृक्रियेत्यादिवचनैरपराह्णकालत्वाभिधानात्कर्मणोयस्ययःकालइत्यादिवाक्यादपराह्ण
व्यापिन्याएवश्राद्धेग्राह्यत्वात्॥ द्देशुक्लइत्यादिवाक्यगतःपूर्वाह्णशब्दस्तुकुतुपपूर्वार्द्धपरः॥
शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणइत्येतद्वाक्यगतपूर्वाह्णसपराह्णशब्दवत्॥ पूर्वलिखि शिव॰
तगोभिलवचनं तत्नाकरम्॥ साकल्येपिपित्रुद्देशेनक्रियमाणतर्प्पणादिविषयंव्याख्ये ५

यमित्यन्यत्रविस्तरः॥ भविष्ये॥ वैशाखेशुक्लपक्षेतुतृतीयायांतथैवच॥ गंगातोयेनरःस्नात्वा॥
मुच्यतेसर्वकिल्बिषैः॥ तस्यांकार्योयवैर्होमोयवैर्विष्णुंसमर्चयेत्॥ यवान्दद्याद्द्विजातिभ्यःप्रय
तःप्राशयेद्यवान्निति॥ अत्रदानविशेषोभविष्ये॥ इमांप्रक्रम्य॥ उदकुंभान्सकरान्सनालान्सर्व
रसैःसह॥ यवगोधूमचणकान्सक्तुदध्योदनंतथा॥ ग्रैष्मिकंसर्वमेवात्रसस्यंदानेप्रशस्य
ते॥ इतिदेवीपुराणे॥ तृतीयायांतुवैशाखेरोहिण्यर्क्षेप्रपूज्यच॥ उदकुंभप्रदानेनशिवलोकेम
हीयते॥ मंत्रस्तु॥ एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः॥ अस्यप्रदानात्तृप्यंतुपितरोपिपि
तामहाः॥ गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं॥ पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठ
त्विति॥ युगादिषुरात्रिभोजनेप्रायश्चित्तमुक्तंकग्विधाने॥ रात्रौभुंक्तेवत्सरेतुमन्वादिषुयुगादि
षु॥ अभिस्त्वावृष्टिमंत्रंचजपेद्दानपातकमितिदशवारमित्यर्थः॥ यमः॥ कृतोपवासाःसलिलंये
युगादिदिनेषुच॥ दास्यंतसन्नैःसुसहितंतेषांलोकामहोदयाइति॥ साचोपवासेपूर्वा॥ सैवधृति

तलर०
६

व्यतीपातेयुगमन्वाद्येदस्तथा॥ सन्मुखाउपवास्युसेर्दनादावंतिमास्सृताइत्यनंतभट्टोदाहृतवच
नात्॥ मलमासपातेतत्रापियुगादिनिमित्तंश्राद्धंकार्यं॥ मन्वादौचयुगादौचतन्मासोरुभयोर
पीतिमरीचिवचनात्॥ तत्रसमुद्रस्नानंमहाफलमुक्तंसौरपुराणे॥ युगादौतुनरःस्नात्वावि
धिवल्लवणोदधौ॥ गोसहस्रप्रदानस्यकुरु. क्षेत्रेफलंतुयत्॥ तत्फलंलभतेमर्त्योभूमिदान
स्यचध्रुवमिति॥ ॥इयमेवतृतीयापरशुरामजयंती॥ साचप्रदोषव्यापिनीग्राह्या॥ तथाच
भार्गवार्चनदीपिकायांस्कांदे॥ वैशाखस्यसितेपक्षेतृतीयायांपुनर्वसौ॥ निशायाःप्रथमे
यामेरामाख्यसमयेहरिः॥ रेणुकायास्तुयोगर्भादवतीर्णोभुविस्वयमिति॥ दिनद्वयेतद्व्या
प्तौअंशातःसमव्याप्तौचपरा॥ अन्यथापूर्वैव॥ तदुक्तंतत्रैवभविष्ये॥ शुक्लातृतीयावैशाखे
शुद्धेपोष्यादिनद्वये॥ निशायांपूर्वयामेचेदुत्तरान्यचपूर्विकेति॥ ॥वैशाखशुक्लसप्तम्यां॥
गंगोत्पत्तिः॥ ॥तदुक्तंपृथ्वीचन्द्रोदये॥ ब्राह्मे॥ वैशाखशुक्लसप्तम्यांजन्हुनाजान्हवीपुरा त्रिवं०
६

॥क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात्॥ तांतत्रपूजयेद्देवींगंगांगगनमेखलामिति॥ इ
यंचशिष्टाचारान्मध्यान्हव्यापिनीग्राह्या॥ दिनद्वयेतद्व्याप्त्यावक्ष्यमाणसोवाक्षर्वापएमुन्योरितियुग्मवा
क्यात्॥ ॥वैशाखशुक्लद्वादश्यांयोगविशेषोहेमाद्रौ॥ पंचाननस्थौगुरुकुजौकातिथिर्व्यतीपात
इतीहयोगः॥ अस्मिंस्तुगोभूमिहिरण्यवस्त्रदानेनसर्वंपरिहायपापं॥ सुरत्वमिंद्रत्वमनाम
यत्वंमर्त्याधिपत्यंलभतेमनुष्यइति॥ पंचाननःसिंहः॥ पात्राभिधातिथिर्द्वादशी॥ करभंहस्तः
॥ ॥वैशाखशुक्लचतुर्दशीनृसिंहजयंती॥ साचप्रदोषव्यापिनीग्राह्या॥ प्रदोषस्यकर्मका
लत्वात्तदुक्तंहेमाद्रौनृसिंहपुराणे॥ वैशाखशुक्लपक्षेतुचतुर्दश्यांनिशामुखे॥ मज्जन्मसं
भवंपुण्यंव्रतंपापप्रणाशनं॥ वर्षेवर्षेतुकर्त्तव्यंममसंतुष्टिकारकमिति॥ दिनद्वयेतद्व्याप्त्या
वंशतःसमव्याप्तौचपरा॥ विषमव्याप्तौअधिकव्याप्तिमती॥ दिनद्वयेतदव्याप्तौगौणकालव्या ८२
पित्वात्पूर्वैतिकेचित्॥ ममत्वेवंप्रतिभातियत्रैकभक्तादौस्वतंत्रगौणकालविधानमस्ति॥ तत्रमु

नृसि० स्यकालव्याप्त्यभावेगौणकालव्याप्त्यानिर्णयोनतुसर्वत्र॥ युग्मादिवाक्यानामानर्थक्यप्रसंगात्॥
७ नचदिनद्वयकर्मकालव्या [illegible] सिपक्षेतस्यनिर्णायकत्वान्नानर्थक्यमितिवाच्यं॥ तत्रापि
गौणकालव्याप्त्याधिक्येननिर्णयात्॥ तस्माद्दिनद्वयेपिप्रदोषव्याप्त्यभावेशुक्लपक्षगतत्वात्प
रैवेति॥ अस्यांचसंकल्परूपव्रतोपवासोमध्याह्नेएवकर्त्तव्यः॥ ततोमध्याह्नवेलायांनद्यादौ
विमलेजलेद्युपक्रम्य॥ परिधायततोवासोव्रतकर्मसमारभेदितितत्रैवोक्तेः॥ तत्रमंत्रः॥ श्री
नृसिंहमहोग्रस्त्वंदयांकुरुत्वाममोपरि॥ अद्याहंचविधास्यामिव्रतंनिर्विघ्नतांनयेति॥ ततोमध्याह्ने
मृज्जोमयतिलामलकैःस्नात्वागृहमागत्यगोमयोपलिप्तेसेष्टदलंकृत्वातत्रकलशंसंस्थाप्यहै
मीफलतदर्द्धतदर्द्धमितांप्रतिमांसंस्थाप्यप्राणप्रतिष्ठांकृत्वाआवाहनाद्युपचारान्कृत्वास्त्र
समयेपंचामृतेनस्नापयित्वागंधादिभिःपूजयेत्॥ तत्रचंदनादिमंत्राः॥ चंदनंशीतलंदिव्यं त्रिव०
द्कुंकुममिश्रितं॥ ददामितवतुष्ट्यर्थंनृसिंहपरमेश्वर॥ इतिचंदनमंत्रः॥ कालोद्भवानिपु ७

ष्पाणित्वलस्यादीनिवैप्रभो॥ पूजयामिनृसिंहत्वांलक्ष्म्यासहनमोस्तुते॥ इतिपुष्पं॥ कालागरु
मयंधूपंसर्वदेवसुवल्लभं॥ करोम्यहंमहाविष्णोसर्वकामसमृद्धये॥ इतिधूपः॥ दीपःपापह
रःप्रोक्तस्तमोराशिविनाशनः॥ दीपेनलक्ष्यतेतेजस्तस्माद्दीपंददामिते॥ इतिदीपः॥ नैवेद्यं
सुखदंचारुभक्ष्यभोज्यसमन्वितम्॥ ददामितेरमाकांतसर्वपापक्षयंकुरु॥ नैवेद्यं॥ नृसि
हाच्युतदेवेशलक्ष्मीकांतजगत्पते॥ अनेनार्घ्यप्रदानेनसफलास्युर्मनोरथाः॥ इत्यर्घमंत्रः॥
पीतांबरमहाबाहोप्रह्लादभयनाशकृत्॥ यथाभूतेनार्चनेनयथोक्तफलदोभवेति॥ प्रार्थना दो
मंत्र॥ एवंपूजयित्वाजागरणादिकुर्यादिति॥ अस्याएवयोगविशेषेणप्राशस्त्यंतत्रैवोक्तम्॥
॥स्वातीनक्षत्रयोगेचशनिवारेमहद्व्रतं॥ सिद्धियोगस्यसंयोगेवणिजेकरणेतथा॥ पुंसांवै
भाग्ययोगेनलभ्यतेदैवयोगतः॥ तथा॥ एतैर्योगैर्विनापिस्यान्मद्दिनंपापनाशनं॥ तथा
॥सर्वेषामपिवर्णानामधिकारोस्तिमद्व्रते॥ तथा॥ विज्ञायमद्दिनंयस्तुलंघयेत्सपकृन्नरः॥

सयातिनरकंघोरंयावच्चंद्रदिवाकरौ॥ अएतेवेदंनित्यकाम्यमित्याहुः॥ वस्तुतस्तुश्रीनृसिंहोपास
कानामेवनित्यंअन्येषांतुकाम्यमेव॥ वैशाखशुक्लपूर्णमास्यांविशेषोभविष्ये॥ वैशाखीका
र्त्तिकीमाघीतिथयोऽतीवपूजिताः॥ स्नानदानविहीयायांनास्ताःनतेयाःपांडुनंदनेति॥ इति
 वैशाखकृत्यानि॥ ॥ज्येष्ठशुक्लतृतीयायांरंभाव्रतं॥ तथाचभविष्ये॥ भक्तिकुरुष्वयत्नेनरंभाख्यं
व्रतमुत्तमं॥ ज्येष्ठशुक्लतृतीयायांस्नातानियमतत्परेति॥ इयंपूर्वविद्धाग्राह्या॥ बृहत्तपातथा
रंभासावित्रीवटपैतृकीकृष्णाष्टमीचभूताचकर्त्तव्यासुमुखीतिथिरितिस्कांदोक्तेः॥ ॥ज्येष्ठ
शुक्लचतुर्थ्यांगौरीव्रतं॥ ब्रह्मपुराणे॥ ज्येष्ठशुक्लचतुर्थ्यांतुजातापूर्वमुमासती॥ तस्मात्सा
तत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये॥ उपहारैश्चविविधैर्गीतनृत्योत्सवादिभिः॥ होमैःपयोभिर्व
स्त्रैश्चपत्रपुष्पैःसुगंधिभिरिति॥ ॥ज्येष्ठशुक्लदशमीदशहरा॥ तदुक्तम्॥ हेमाद्रौभविष्ये॥
ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता॥ हरतेदशपापानितस्माद्दशहरास्मृतेति॥ वाराहे॥ तु

गंगायादशहरात्वमुक्तं॥ दशम्यांशुक्लपक्षेतुज्येष्ठेमासिकुजेहनि॥ अवतीर्णाह्यतःस्वर्गाद्धस्तर्क्षे
चसरिद्वरा॥ हरतेदशपापानितस्माद्दशहरास्मृता॥ तस्मात्स्नानंप्रकुर्वीतदानंचैवविशेषत
इति॥ स्कांदेतुदशयोगाउक्ताः॥ ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः॥ गरानंदेव्यतीपाते
कन्याचंद्रेवृषेरवौ॥ दशयोगेनरःस्नातःसर्वपापैःप्रमुच्यते॥ इति॥ इहबुधभौमयोर्विकल्पः॥
इयंचखंडैवयत्रयोगबाहुल्यंसाग्राह्या॥ योगाधिक्यफलाधिक्यात्॥ गंगायाअभावेअन्यस्यां
सरितिकार्यं॥ तथाचस्कांदे॥ यांकांचित्सरितंप्राप्यदद्याद्दर्भतिलोदकम्॥ मुच्यतेदशभिःपापैः
ःसमहापातकैरपि॥ दशपापान्युक्तानिस्कांदे॥ अदत्तानामुपादानंहिंसाचैवाविधानतः॥ पर
दारोपसेवाचकायिकंत्रिविधंस्मृतं॥ पारुष्यमनृतंचैवपैशून्यंचापिसर्वशः॥ असंबद्धप्रलाप
श्चवाङ्मयंस्याच्चतुर्विधं॥ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनम्॥ वितथाभिनिवेशश्चमानसं
त्रिविधंस्मृतमिति॥ अत्रविशेषःकाशीखंडे॥ ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं॥ दश

कृत्स०
९

श्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः॥ एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः॥ आमुक्तकपक्षद
शमीप्रतिजन्माद्यमुत्सृजेदिति॥ तथा॥ लिंगदशाश्वमेधेशंदृष्ट्वादशहरातिथौ॥ दशजन्मार्जि
तैःपापैस्त्यज्यतेनात्रसंशयइति॥ मलमासपातेतुतत्रापिदशहराकृत्यंकार्यं॥ पुनःशुद्धेतुभ
वत्येव॥ अन्यत्रमलेतोदृष्टव्यम्॥ ज्येष्ठशुक्लैकादश्यांनिर्जलैकादशीव्रतं॥ मदनरत्नेस्कांदे॥
ज्येष्ठेमासिसितपक्षेष्टयाशुक्लैकादशीशुभा॥ निर्जलंसमुपोष्यात्रजलकुंभान्सशर्करान्॥ प्रदाय
विप्रमुख्येभ्यस्तापत्रयविवर्जितः॥ विष्णुलोकमवाप्येहमोदतेविष्णुसन्निधौइति॥ ज्येष्ठपू
र्णमास्यांसावित्रीव्रतं॥ स्कांदभविष्ययोः॥ ज्येष्ठेमासिसितेपक्षेद्वादश्यांरजनीमुखइत्युपक्रम्य
व्रतंत्रिरात्रमुद्दिश्यदिवारात्रंस्थिराभवेत्॥ इत्युक्तांतेउपसंहृतं॥ ज्येष्ठेमासिसितेपक्षेपूर्णिमायां
व्रतंशुभं॥ चीर्णंपुरामहाभक्त्याकथितंतेमयानघेति॥ दाक्षिणात्यास्त्वेतमेवकुर्वंति॥ पाश्चात्ता
दयस्तुअमायामाचरंति॥ उक्तंचनिर्णयामृतेभविष्ये॥ अमायांचतथाज्येष्ठेवटमूलेमहासती॥ शिव०
९

आषाढतृतीयाअग्नियकल्पादिः॥ आषाढामावास्यापिभ्रकल्पादिः॥ आषाढशुक्लद्वितीयायांरथयात्राक्तास्कांदे॥ आषाढस्यसितेपक्षेद्वि
तीयापुष्यसंयुता॥ तस्यांरथेसमारोप्यरामंमांभद्रयासह॥ यात्रोत्सवंप्रवर्त्याथप्रीणयेच्चबहून्द्विजान्॥ ऋक्षाभावेतिथौकार्यास
दासाप्रीतयेममेति॥ मांजगन्नाथं॥ आषाढशुक्लचतुर्थीरथंतरकल्पादिः॥ २+

त्रिरात्रोपोषितानारीविधिनानेनपूजयेत्॥ अशक्तौतुत्रयोदश्यांनक्तंकुर्याज्जितेंद्रिया॥ अयाचि
तंचतुर्दश्याममायांसमुपोषणमिति॥ हेमाद्र्यादिभिस्तु [illegible] पूर्णिमायामिदमुक्तं॥ अत्रपूर्णिमा
ऽमावास्येपूर्वविद्धेग्राह्ये॥ भूत विद्धानकर्तव्याअमावास्याचपूर्णिमा॥ वर्जयित्वासुरश्रेष्ठसा
वित्रीव्रतमुत्तममितिब्रह्मवैवर्तात्॥ अत्रपूर्णिमानुरोधेनयथात्रिरात्रसंपत्तिर्भवति॥ तथात्र
योदश्यादिग्राह्यम्॥ तस्याःप्राधान्यात्॥ एवममायामपिअस्यामेवपूर्णिमास्यांविशेषआदित्य
पुराणे॥ ज्येष्ठेमासितिलान्दद्यात्पूर्णिमायांविशेषतः॥ अश्वमेधस्ययत्पुण्यंप्राप्नोत्येवनसंशय
इति॥ विष्णुस्मृतौज्येष्ठीज्येष्ठायुताचेत्स्या[illegible]च्छत्रोपानत्प्रदानेन
नराधिपत्यमाप्नोतीति॥ इयंरौच्यमन्वादिः॥ तथावामनपुराणे॥ उदकुंभांबुदानंचतालवृंतंच
चंदनं॥ त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिचेति॥ इतिज्येष्ठकृत्यानि॥ आषाढस्यशु
क्लदशमीपूर्णमासीचमन्वादिः॥ निर्णयस्तुपूर्वमुक्तः॥ आषाढभाद्रपदकार्तिकशुक्लद्वाद

त्रीषु अनुराधाश्रवणरेवतीयुक्तासु पारणं न कार्यमित्युक्तं भविष्ये ॥ आभाकासितपक्षेषु मैत्रश्रव
णरेवती ॥ संगमे नैव भोक्तव्यं द्वादश्यां द्वादशीं हरेरिति ॥ अत्र विशेषो विष्णुधर्मे ॥ मैत्राद्यपादे स्वपिती
ह विष्णुः श्रुतेः श्रवणमध्ये परिवर्त्तमेति ॥ पौष्णांत्यपादे प्रतिबोधमेति ॥ सुप्तिप्रबोधपरिवर्त्तनमेव वर्ज्यमि
ति ॥ आषाढशुक्लैकादश्यां तद्द्वादश्यां वा विष्णुशयनोत्सवः कर्त्तव्यः ॥ तदुक्तं ब्राह्मे ॥ एकादश्यां तु
शुक्लायामाषाढे भगवान्हरिः ॥ भुजंगशयने शेते क्षीरार्णवजले सदेति ॥ भविष्ये ॥ द्वादश्यां
शुक्लपक्षे च प्रस्वापावर्त्तनोत्सव इति ॥ वाराहे ॥ द्वादश्यां संधिसमयेन नक्षत्राणामसंभवे ॥ आभा
कासितपक्षेषु शयनावर्त्तनादिकमिति ॥ अत्र द्वादश्यामिति पारणाहर्विवक्षितं ॥ पारणाहे पूर्वरा
त्रे घंटादीन्वादयन्मुहुरिति रामार्च्चनचंद्रिकायामुक्तं ॥ इदं च मलमासे न कर्त्तव्यं ॥ ईशानस्य च
लेर्विष्णोः शयनं परिवर्त्तनमिति कालादर्शे निषेधात् ॥ अत्रैव चातुर्मास्यारंभो भारते उक्तः ॥ आ
षाढे तु सिते पक्षे एकादश्यामुपोषितः ॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नर इति ॥ अस्य

नित्यत्वं तत्रैवोक्तं ॥ वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः ॥ व्रतेन नो चेदाप्नोति किल्बिषं वत्स
रोद्भवम् ॥ असंभवे तुलार्के तु कर्त्तव्यं तत्प्रयत्नत इति ॥ अस्यारंभः शुक्लाषाढादावपि कार्यः ॥ नत्रै
शांवनमौढ्यं च शुक्रगुर्वोर्निबातिथेः ॥ खंडत्वं चिंतयेदादौ चातुर्मास्यविधौ नर इति वचनात् ॥ इदं
च द्वितीयाद्यारंभवि[illegible]षयं ॥ एवमाद्येचादौ द्वितीयारंभो भव
त्येव ॥ अशुचिर्वा [illegible] शुचिर्वापि यदि स्त्री यदि वा पुमान् ॥ व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति
स्कांदोक्तेः ॥ प्रारब्धे सूतकं न स्यादनारब्धे च सूतकमिति विष्णुवचनाच्च ॥ यत्तु असंक्रांतं तथा मासं
दैवे पित्र्ये च कर्म्मणि ॥ मलमासमशौचं च वर्जयेन्मतिमान्नर इति भविष्यपुराणवचनं तत्प्रथमारं
भविषयम् ॥ व्रतग्रहणे प्रकारस्तु हेमाद्रौ भविष्ये ॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः ॥
प्रभाषेतायतो विष्णोः कृतांजलिपुटस्तथा ॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥ इमं करि
ष्ये नियमं निर्विघ्नं कुरु मेऽच्युतेति भविष्ये ॥ श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ॥ दुग्धमा

कृत्यर०

११

रत्न

श्वयुजे मासि कार्त्तिके द्विदलं त्यजेत् ॥ स्कांदे ॥ चत्वार्येतानि नित्यानि चतुराश्रमवर्त्तिनां ॥ प्रथमे मा
सि कर्त्तव्यं नित्यं शाकव्रतं नरैः ॥ द्वितीये मासि कर्त्तव्यं दधिव्रतमनुत्तमम् ॥ पयोव्रतं तृती ये तु चतुर्थे
पि निशामय ॥ द्विदलं बहुबीजं च वृंताकं चैव वर्ज्जयेत् ॥ नित्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिण
ः ॥ जंबीरं राजमाषांश्च मूलकं मूलकं ॥ कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः ॥ तथा ॥ विशेषा
द्बदरीधात्रीकूष्मांडं तिंतिणीं त्यजेत् ॥ जीर्णधात्रीफलं ग्राह्यं कथांचिकायशोधनमिति स्कांदे ॥ वा
र्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्द्दने ॥ मंचखट्वादिवायनं वर्ज्जयेच्छक्तिमान्नरः ॥ अनृतौ वर्ज्ज
येद्भार्यां मांसं मधु परौदनम् ॥ पटोलं मूलकं चैव वृंताकं च न भक्षयेदित्यादि ॥ शाकशब्दश्च दश
सु रूढः ॥ मूलपत्रकरीराग्रफलकांडाधिरूढकाः ॥ त्वक्पुष्पं कवचं चैव शाकं दशविधं स्मृतमि
त्युक्तेः ॥ अधिरूढं अंकुरः ॥ आचारप्रदीपे ॥ वृंताकं च कलिंगं च विल्वोदुंबरभिस्सटाः ॥ उदरे
यस्य जीर्यंति तस्य दूरतरो हरिः ॥ भिस्सटं दग्धधान्यं ॥ भीः स्सटेति दीर्घपाठे भीः सटं श्लेष्मातकमि

चै

शिव०

११

ति धन्वंतरिनिघंटुः ॥ तथा ॥ निष्पावान्राजमाषांश्च मसूरं संधितानि च ॥ वृंताकं च कलिंगं च सु
स्नेहे वै विवर्ज्जयेत् ॥ संधितानि लवणशाकादीनि ॥ अत्रैव तप्तमुद्राधारणमुक्तं रामार्च्चनचंद्रि
कायां ॥ ॥ आषाढपूर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये ॥ आषाढपूर्णिमास्यां तु संध्या
काल उपस्थिते ॥ संकल्पयेन्मासमेकं श्रावणे प्रत्यहं त्वहं ॥ स्नानं करिष्ये नियता ब्रह्मचर्ये स्थि
ता सती ॥ भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति ॥ अस्यां नक्तव्रतत्वात्प्रदोषव्या
पिनी ग्राह्या ॥ अत्रैव व्यासपूजोक्ता ॥ तत्र मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये तादृश्यां चेत्परै
वेति संन्यासपद्धतौ ॥ इत्याषाढकृत्य ॥ ॥ पौर्णमास्यंत श्रावणकृष्णतृतीयायां श्रवणयुक्ता
यां विष्णुपूजा ॥ तदुक्तं हेमाद्रौ ॥ विष्णुधर्मोत्तरे ॥ तृतीया श्रावणे कृष्णा यास्याच्छ्रवणसंयुता ॥ त
स्यां संपूज्य गोविंदं तुष्टिमग्र्यां समाप्नुयादिति ॥ श्रावणशुक्लतृतीया मधुस्रवाख्या ॥ गुर्ज्जरेषु प्र
सिद्धा ॥ सा परयुता ग्राह्येति दिवोदासीये ॥ श्रावणशुक्लचतुर्थी गणपतिव्रते मध्याह्नव्यापिनी

कृत्यर० ग्राह्या॥ दिनद्वये तद्व्याप्तौ अव्याप्तौ वा पूर्वा॥ तथा च बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृवि
१२ द्धा प्रशस्यते॥ मध्याह्नव्यापिनी सा तु परश्चेत्परेऽहनीति॥ श्रावणशुक्लपंचम्यां नागपूजोक्ता भ
विष्ये॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्ब
त णाः॥ पूजयेद्विधिवत्क्षीरदधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्प्पणैः॥ ये त
स्यां पूजयंतीह नागान्भक्तिपुरःसराः॥ न तेषां सर्वतो वीर भयं भवति कुत्रचिदिति॥ ॥
श्रावणशुक्लद्वादश्यां दधिव्रतं प्रागुक्तं॥ तत्र तक्रादीनां न निषेधः॥ तत्र दधित्वाभावात्॥ अत्रै
व द्वादश्यां विष्णोः पवित्रारोपणं॥ हेमाद्रौ विष्णुरहस्ये॥ श्रावणस्य सिते पक्षे कर्कटस्थे दिवा
करे॥ द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्॥ द्वादश्यां श्रावणे वापि पंचम्यामथवा द्वि
ज॥ अनुकल्पेषु कर्त्तव्यं पंचदश्यामथापि वेति॥ शिवे तु तत्रैव कालोत्तरे॥ आषाढांते चतुर्दश्यां शिवं०
नभस्य नभसोस्तथा॥ अष्टम्यां चतुर्दश्यां पक्षयोरुभयोः सममिति॥ अधिवासनं तु दीपिकायां॥ १२
चं

गोदोहं तरितिकाले पूर्वेद्युरधिवासनमिति॥ गौणकालस्तूक्तो रामार्च्चनदीपिकायां॥ पवित्रारोप
णं विघ्नात् श्रावणे न भवेद्यदि कार्त्तिक्यवधि शुक्लास्ते कर्त्तव्यमिति नारदः॥ शुक्लास्तेपीत्यर्थः॥
तथा॥ हेमरौप्यताम्रक्षौमैस्सूत्रैः कौशेयपद्मजैः॥ कुशैः काशैश्च कार्प्पासैर्ब्राह्मण्याकर्तितैः
शुभैः॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्॥ तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः॥
सप्तत्या सहितं ताभ्यां शताभ्यां मध्यमं स्मृतं॥ साशीतिना शतेनैव कनिष्ठं तत्समाचरेत्॥ साधारणप
वित्राणि त्रीणि सूत्रैः समाचरेत्॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथिमध्यमं॥ कनिष्ठं तु पवित्रं स्याद
ग्रं ष्टविंश थिशोभितं॥ षड्विंशाच्च चतुर्विंशत् द्वादशेति च केचन॥ चतुर्विंशाद्दशाष्टावित्येके मुनयो के
विदुरिति हेमाद्रौ॥ विष्णुरहस्ये॥ उत्तमं चैव तंतूनां शतमष्टोत्तरं स्मृतं॥ चतुःपंचाशता तंत्यं तं
तूनां मध्यमं परं॥ कनिष्ठं तंतुभिर्ज्ञेयं सप्तविंशतिभिः शुभं॥ शिवपवित्रं तु तत्रैव शिवागमे॥
एकादशाभिर्वा त्रिस्त्रिंशता वाष्टयुक्तया पंचाशता वा कर्त्तव्यं॥ तुल्यग्रंथ्यंतरालकं॥ द्वादशां

रुसर० गुलमानानिव्यासादष्टांगुलानिच॥ लिंगविस्तारमानिचतुरंगुलकानिचेति॥ तत्रमंत्रः॥ देवदेवन ना
१३ मस्तुभ्यंगृहाणेदंपवित्रकं॥ पवित्रीकरणार्थायवर्षपूजाफलप्रदं॥ पवित्रकंकुरुष्वाद्ययन्मयादुष्कृ
तंकृतं॥ शुद्धोभवाम्यहंदेवत्वत्प्रसादात्सुरेश्वरेति॥ मूलमंत्रसंपुटितेनानेदद्यात्॥ प्रार्थना॥ मणि
विद्रुममालाभिर्मंदारकुसुमादिभिः॥ इयंसांवत्सरीपूजातवास्तुगरुडध्वज॥ वनमालांयथादेव
कौस्तुभंसततंहृदि॥ पवित्र [illegible] मस्तुतेतद्वत्पूजांचहृदयेवहेति॥ एतच्चनित्यं॥ तत्रैवग
नकरोतिविधानेनपवित्रारोपणंतुयः॥ तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम॥ तस्माद्भक्ति
समायुक्तैर्नरैर्विष्णुपरायणैः॥ वर्षेवर्षेविधातव्यंपवित्रारोपणंहरेरिति॥ तथा॥ पवित्रारोपणं
कालंनकरोतिकथंचन॥ तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमाहित इति॥ श्रावणशुक्लचतुर्दशीह
वीविशेषाद्या॥ चैत्रशुक्लचतुर्दशीवत्॥ अथोपाकर्मतच्चबह्वृचैःश्रवणेकार्यं॥ याजुषैःपूर्णमा शिव०
स्यां॥ सामगैःसिंहस्थेसूर्येहस्तनक्षत्रेएषांखंडत्वेऔदयिकानिग्राह्याणि॥ एषांग्रहणसंक्रांति १३
धा

दुष्टत्वेबह्वृचैः॥ श्रावणशुक्लपंचम्यांयजुर्वेदिभिर्भाद्रपद्यां॥ येषां [illegible] ग्रहोआ
पाढीउक्तातैराषाढ्यांकार्यं॥ वाजसनेयिभिस्तुपंचम्यां॥ उपाकृतिस्तुपंचम्यांकार्यावाजसनेयिभि जू२
रितिवचनात्॥ वाजसनेयिग्रहणंयेषांगृह्येपंचमीउक्तातेषामुपलक्षणम्॥ ग्रहसंक्रांतियोगश्चा
च ईराद्यात्सर्वविद्यमानएवदूषकोनान्यथा॥ तथागार्ग्यः॥ अर्द्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणंत
था॥ उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृदिति॥ इदंचकर्कटस्थेभानौनिषिद्धम्॥ सचनिषेधो
नर्मदोत्तरभागविषयः॥ नर्मदोत्तरेभागेतुकर्त्तव्यंसिंहयुक्तके॥ कर्कटेसंस्थितेभानौतूपाकु
र्यात्तुदक्षिणेइतिवचनात्॥ एतच्चशुक्रास्तादावपिकार्यं॥ प्रथमारंभस्तुनतत्रकर्त्तव्यः॥ अधिमा
सेनभवत्येव॥ सामगानांत्वधिमासेऽपिभवति॥ [illegible] तेषांसिंहस्थेसूर्यविधानात्
॥ एतच्चसामगैरपराह्णेकार्यं॥ इतरैःपूर्वाह्णेः॥ इदंचौपासनाग्नौभवति॥ अध्यायैरन्वारब्ध
इतिपक्षेलौकिके॥ श्रावण्यांआश्वलायनेनश्रवणाकर्मोक्तं॥ श्रावण्यांपूर्णमास्यांश्रवणाक

कृत्यर० १४ मेति॥ तत्रास्तमययुग्ग्राह्या॥ अस्तमितेस्थालीपाकंश्रपयितेति अस्तमयकालेविधोक्तकर्मणोय
स्यमः कालइतिवचनात्॥ यत्रिकास्तुपूर्णमासीत्राहःस्वदर्पिर्वालक्षणवचनत्वात्सर्वसंधिदि
वसेरात्रौश्रवणाकर्मानुष्ठानंवदन्ति॥ ॥अत्रैवरक्षाबंधनमुक्तंभविष्ये॥ ततोपराह्नसमयेकुर्या
त्पोटलिकांशुभाम्॥ कारयेदक्षतैस्तद्धत्सिद्धार्थैर्हैमचर्चिताम्॥ तत्रमंत्रः॥ येनबद्धोबलीरा
जादानवेन्द्रोमहाबलः॥ तेनत्वांप्रतिबध्नामिरक्षेमाचलमाचलेति॥ अत्रापराह्णव्यापिनी
पूर्वग्राह्या॥ श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी॥ पूर्वविद्धैवकर्त्तव्याशिवरात्रिर्बलेर्दिन
मिति॥ बृहस्पतिवचनात्॥ अस्मादेववचनादन्येष्वपिपवित्रारोपणादिश्रावणीकृत्येषुपूर्वै
वग्राह्या॥ पूर्वस्यांभद्रासत्वेतूत्तरस्यामेवरक्षाबंधनंकार्यं॥ भद्रायांद्वेनकर्त्तव्येश्रावणीफा
ल्गुनीतथा॥ श्रावणीनृपतिंहन्तिग्रामंदहतिफाल्गुनीतिवचनात्॥ ॥सिंहस्थितेभानौचगो त्रिव० १४
प्रसवेसतिशान्तिःकार्येति॥ यथोक्तंअद्भुतसागरेनारसंहेन॥ भानौसिंहस्थितेचैवयस्यगोः

संप्रसूयते॥ मरणंतस्यनियतंषड्भिर्मासैर्नसंशयः॥ तत्रशान्तिंप्रवक्ष्यामिययासंपद्यतेशुभं॥ आ
हुतीनांघृताक्तानामयुतंजुहुयान्नरः॥ व्याहृतिभिश्चायंहोमः॥ सोपवासःप्रयत्नेनदद्याद्विप्राय
दक्षिणामिति॥ अथर्ववेदिनांगृह्यपरिशिष्टे॥ माघेबुधेचमहिषीश्रावणेवडवादिवा॥ सिंहेगा
वःप्रसूयंतेस्वामिनोमृत्युदायकाइति॥ यत्रतुक्ताअमृताशांतिःकार्या॥ श्रावणादिमासचतुष्ट
येकृष्णपक्षद्वितीयासुअशून्यव्रतम्॥ तत्रचन्द्रोदयव्यापिनीग्राह्या॥ दिनद्वयेतथासत्वेऽसत्वे
चपरा॥ द्वितीयाकृष्णपक्षेषुमासेषुश्रावणादिषु॥ अशून्याख्यंव्रतंकुर्याज्जिष्णायातुफलाधि
कं॥ मितिमदनरत्नवचनात्॥ श्रावणकृष्णतृतीयाकज्जलीसंज्ञासापरेतिदिवोदासीये॥ नभो
बधकृष्णचतुर्थीबहुलाख्यामध्यदेशेप्रसिद्धा॥ सावसायाह्नव्यापिनीग्राह्या॥ दिनद्वयेतथात्वेपूर्वा
॥अत्रगोपूजायवान्नाशनंचकार्यमितिदिवोदासीये॥ ॥अस्यामेवचतुर्थ्यांसंकष्टचतुर्थीव्रतं
स्कांदे॥ श्रावणेबहुलेपक्षेचतुर्थ्यांतुविधूदये॥ गणेशंपूजयित्वातुचंद्रायार्घ्यंतुदीयते॥ इयंच

न्द्रोदयव्यापिनीग्राह्या॥ कर्मणोयस्ययःकालइतिवचनात्॥ तत्कालेचंद्रार्घ्यदानविधानेनचन्द्रो
दयव्रतत्वाच्चन्द्रोदयव्रतेसैवतिथिस्तत्कालिकीस्मृतेतिवचनाच्च॥ दिनद्वयेचन्द्रोदयेसत्वेऽसत्वेवा
पूर्वा॥ चतुर्थीचतृतीयायांमहापुण्यफलप्रदा॥ कर्त्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीतिब्रह्म
वैवर्त्तात्॥ गणेशगौरीबहुलाव्यतिरिक्ताःप्रकीर्त्तिताः॥ चतुर्थ्यःपंचमीविद्धादेवतांतरयोगतइ
तिवचनाच्च॥ नचतृतीयाविद्धविधायकानिवचनानिदिवात्रिमुहूर्त्तविधेसत्येवंप्रवर्त्तंतेनरात्रि
योगमात्रइतिवाच्यं॥ रात्रिसाध्यकर्मसुरात्रिवेधस्यजन्माष्टमीप्रकरणेमाधवादिभिर्दर्शितत्वात्
॥अतएवमहालक्ष्मीव्रतसमापने॥ दिनद्वयेअष्टम्यांचंद्रोदयव्यापित्वे॥ कृष्णपक्षेष्टमीचैव
कृष्णपक्षेचतुचतुर्द्दशी॥ पूर्वविद्धैवकर्त्तव्यापरविद्धानकुत्रचिदितिवचनात्पूर्वविद्धैवग्राह्येत्यु
क्तंहेमाद्रौमदनरत्नेच॥ यानितुचतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते॥ मध्याह्नव्यापिनीसा शिव. १५
तुपरतश्चेत्परेऽहनीत्यादीनिवचनानितानिसिद्धिविनायकादिव्रतविषयाणि॥ तेषुमध्याह्नस्यकर्म

कालत्वात्॥ प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृपेतिवचनात्॥ अतएवमाधवेनमध्याह्न
स्यकर्मकालत्वमंगीकृत्यैवविनायकव्रतेमध्याह्नव्यापिनीग्राह्येत्युक्तं॥ तस्मादुभयत्रचन्द्रोद
येसत्वेऽसत्वेवापूर्वैतिन्याय्यःपंथाः॥ इत्यलंबहुना॥ ॥अथजन्माष्टमी॥ ॥साचश्रावणकृष्णा
ष्टमी॥ पूर्णिमांतमासपक्षेभाद्रपदकृष्णाष्टमी॥ साचशुद्धविद्धभेदेद्विधापिप्रत्येकंद्विविधा॥ द्वि
१दयो तीयदिनेसूर्योत्तरंसत्यसतीच॥ तादृशापिपुनःप्रत्येकंद्विधारोहिणीसहितातद्रहिताच॥ तत्रशु
द्धायांविद्धायांचद्वितीयदिनेसूर्योदयादूर्ध्वंअसत्त्वांविवादएवनास्ति॥ द्वितीयदिनेष्टम्यभावात्॥ शु
द्धाधिकायांविद्धाधिकायांवाएकस्मिन्नेवदिनेरोहिणीयोगेयैवरोहिणीयुतासैवग्राह्या॥ दिन
द्वयेपिरोहिणीयोगेअर्द्धरात्रेतद्योगवतीःग्राह्या॥ अर्द्धरात्रेतुयोगोऽयंतारापत्युदयेसतीतिवि
ष्णुधर्मोक्तेः॥ दिनद्वयेप्यर्द्धरात्रंविहायरोहिणीयोगेसप्तमीविद्धानिषेधान्नवमीयुक्तायाःप्रश
स्तत्वादुत्तराग्राह्या॥ दिनद्वयेपिरोहिणीयोगाभावेअर्द्धरात्रव्यापिनीग्राह्या॥ अर्द्धरात्रस्यकर्मकाल त्र

कृत्यर०
१९
त्वात्॥ दिवावायदिवारात्रौनास्ति चेद्रोहिणीकला॥ रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुताम्॥ इति
वचनाच्च॥ इदंचनित्यं॥ वर्षेवर्षेतुकर्त्तव्यातुष्ट्यर्थंचक्रधारिण इतिवीप्साश्रवणात्॥ अकुर्वन्नर
कंयातियावदिंद्राश्चतुर्दशेतिअकरणेप्रत्यवायश्रवणाच्च॥ काम्यंचेदंफलस्यापिश्रवणात्
॥तथाचस्कान्दे॥ सिध्यंतिसर्वकार्याणिकृतेजन्माष्टमीव्रतइति॥ पारणंतुकेवलाष्टम्युपवा
सेतिथ्यंते॥ रोहिणीयुक्ताष्टम्युपवासेउभयांतेकर्त्तव्यमितिमुख्यःपक्षः॥ अन्यतरांतेगौण
:॥ यदिरात्रावुभयोरन्यतरस्यचांतस्तदारात्रावपिपारणंकार्यं॥ नरात्रौपारणंकुर्यादृतेवै
रोहिणीव्रतात्॥ तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशामितिवचनात्॥ अस्यवाक्येनउत्स
वांतेकार्यं॥ माधवेनतुयामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणमितिवचनंलिखित्वातदनुसा
कृ रेणैवनिर्णयितं॥ श्रीकृष्णदेवकीवसुदेवनंदयशोदादिप्रतिमानिर्माणतत्पूजाप्रकारविशे श्रीव०
षादिकालत्वविवेचनेद्रष्टव्यम्॥ विस्तरभयान्नेहलिख्यते॥ संकल्पमंत्रस्तु॥ वासुदेवंसमुद्दि १९

श्यसर्वपापप्रशांतये॥ उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहमिति॥ चंद्रार्घ्यमंत्रस्तुभविष्ये॥
क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव॥ गृहाणार्घ्यंशशांकेमंरोहिण्यासहितोमम॥ ज्योत्स्नाप
तेनमस्तुभ्यंनमस्तेज्योतिषांपते॥ नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यतामिति॥ इतिजन्माष्ट
मी॥ श्रावण्याममावास्यायांकुशग्रहणमुक्तंहेमाद्रौहारीतेन॥ मासेनभस्यमावास्यातस्यांद
र्भोच्चयोमतः॥ अयातयामास्तेतेयाविनियोज्याःपुनःपुनरिति॥ नभःश्रावणःदर्शांतपक्षेणे
तस्यां दम्॥ मदनरत्नेतु॥ मासेनभस्यमावास्यादर्भोच्चयोमतइतिमरीचिवाक्यमुदाहृतं॥ तत्पूर्णिमांतमा
साभिप्रायेणेति हारीतेनएकवाक्यतैव॥ इतिश्रावणकृत्यम्॥ ॥भाद्रपदशुक्लतृतीयायां
को हरितालिव्रतमुपरा॥ रंभाख्यांवर्जयित्वातुतृतीयांद्विजोत्तम॥ अन्येषुसर्वकार्येषुगणयुक्ता
प्रशस्यतइतिब्रह्मवैवर्त्तात्॥ तृतीयातुनकर्त्तव्याद्वितीयासंयुतातिथिरितिस्कांदेद्वितीयायुक्ता
निषेधाच्च॥ निषेधप्रयोजकश्चद्वितीयांवेधोनत्रिमुहूर्त्तः॥ किंतुकलाकाष्ठादिरूपोपि॥ तदुक्तं॥

स्कांदे॥ कलाकाष्टादिवाचैवद्वितीयासंप्रदृश्यते॥ सातृतीयानकर्त्तव्याकर्त्तव्यागणसंयुतेति अ
तएवस्वल्पापितृतीयाचतुर्थीयुक्ताएकादशीवद्ग्राह्या॥ अयंचअल्पवेधप्रयुक्तोनिषेधोगौ
रीव्रतविषयः॥ विहायैकांतुरंभाख्यामितिपर्यु दासेनतत्सदृशानामेवव्रतांतराणांप्रतीतेः॥
न जीवयुक्तमन्यः सदृशार्थे इतिन्यायात्तथैवशिष्टाचाराच्चेति॥ ॥भाद्रपदशुक्लचतुर्थ्यांसिद्धि
विनायकव्रतंस्कांदे॥ कृष्णउवाच॥ गजवक्त्रंतुशुक्लायांचतुर्थ्यांपूजयेन्नृप॥ यदाचोत्सवृतेभ
क्तिस्तदापूज्योगणाधिपः॥ प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृप॥ स्वशक्त्यागणना
थस्यस्वर्णरौप्याम पाकृतिं॥ अथवामृन्मयींकुर्याद्वित्तशाठ्यंनकारयेत्॥ गणनाथस्यसि
द्धिविनायकस्य॥ तस्यरूपमुक्तंतत्रैव॥ एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं॥ पाशांकुशध
रंदेवंध्यायेत्सिद्धिविनायकमिति॥ एवंप्रतिमांकृत्वाप्राणप्रतिष्ठांकुर्यात्॥ तद्विधिः कालि शिव०
कापुराणे॥ प्रतिमायाःकपालौद्वौस्पृष्ट्वादक्षिणपाणिना॥ प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यबाहरे १७

ति

अकृतायांप्रतिष्ठायांप्राणानांप्रतिमासुच॥ यथापूर्वंतथाभावःस्वर्णादीनांनदेवताः॥ अन्येषामपि
देवानांप्रतिमास्वपिपार्थिव॥ प्राणप्रतिष्ठाकर्त्तव्यातस्यांदेवत्वसिद्धये॥ अथप्राणप्रतिष्ठाप्रयोगः
गणेशप्रतिमायाःदक्षिणपाणिनास्पृष्ट्वा गंगंगणानांत्वेतिमंत्रंपठित्वागणेशायप्रतिष्ठंतुगणे
शायप्राणाःक्षरंतुचगणेशायदेवत्वसंख्यायैस्वाहा॥ अन्यदेवेषुतद्बीजमंत्रौपठित्वाचतुर्थ्यंतत
द्देवतापदयुक्तंपूर्वोक्तंमंत्रंपठेदितिततः॥ कृत्वाप्रयत्नेनस्नाप्यपंचामृतैःपृथक्पृथक्॥ गणा
ध्यक्षेतिनाम्नावैगंधंदद्याच्चभक्तितः॥ विनायकेतिपुष्पाणिधूपंचोमासुतेतिच॥ दीपंरुद्रप्रिया
येतिनैवेद्यंविघ्ननाशिने॥ वस्त्रंसर्वप्रदेरक्तंयुग्मंदद्यात्सुभावितः॥ ततोदूर्वांकुरान्गृह्यविंशतिंचै
कमेवच॥ पूजनीयःप्रयत्नेनएभिर्नामपदैःपृथक्॥ तानिवक्ष्यंते॥ दूर्वायुग्मंगृहीत्वातुगंधयुक्तं
प्रपूजयेत्॥ एकैकेनचनाम्नायैदत्वैकंसर्वनामभिः॥ तथैकविंशतिंगृह्यमोदकान्घृतपाचितान्॥
स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन॥ दशविप्रायदातव्याःस्वयंचाद्यात्तथादश॥ एकंगण

कृत्यर०
१०
काय

धिपेदद्यात्ततो नैवेद्यं नरपोत्तम ॥ विप्राय भोजनं दद्याद्भुंजीयात्तैलवर्जितमिति ॥ अथ संक्षेपेण प्रयो
गः ॥ प्रातः कृतनित्यक्रियः सूर्यादिदेवताभ्यो व्रतं निवेद्योदङ्मुखो वारिपूर्णताम्रपात्रं गृहीत्वा मम
सर्वविघ्नसिद्धिपुत्रसौभाग्यसंपत्प्राप्तिद्वारा श्रीगणेशप्रीत्यर्थं सिद्धिविनायकव्रतं करिष्ये
इति संकल्प्य प्रतिमां कृत्वा प्राणप्रतिष्ठां कृत्वा आवाहनादि कृत्वा पंचामृतैः पृथक्कृत्वं स्नाप्य ॥ उमांग
णाध्यक्षाय नमः गंधं समर्प्पयामि ॥ विनायकेनमः पुष्पं ॥ उमासुताय धूपं ॥ रुद्रप्रियाय दीपं ॥
विघ्ननाशिनेनमः एकमोदकसहितं नैवेद्यं ॥ सर्वप्रदाय वस्त्रयुगं ॥ इत्येवं कृत्वा एकविंशतिदूर्वा
ः ॥ सगंधा गृहीत्वा एकैकेन नाम्ना दूर्वायुग्मं दद्यात् ॥ गणाधिपाय नमः दूर्वायुग्मं समर्प्पया
मि ॥ उमापुत्राय नमः ॥ अघनाशनाय नमः ॥ विनायकाय नमः ॥ ईशपुत्राय नमः ॥ सर्वसिद्धि
प्रदाय नमः ॥ एकदंताय नमः ॥ इभवक्त्राय नमः ॥ मूषकवाहनाय नमः ॥ कुमारगुरवे० ॥ त
तो वशिष्टां एकं ॥ गणाधिपेत्यादि सर्वनामभिः समर्प्य विंशतिमोदकान्ना एवं स्थाप्य दश ब्राह्म

शिव०
१८
शर्मा

णाय सदक्षिणान्दत्वा ब्राह्मणभोजनं दत्वा स्वयं दशमोदकसहितनैवेद्यं पक्वान्नं भुंजीतेति ॥ अत्र
चतुर्थी मध्याह्नव्यापिनी ग्राह्या ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति स्कंदपुराणे मध्या
ह्नस्य कर्मकालत्वाभिधानात् ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ मध्याह्नव्यापिनी सा तु
परतश्चेत्परेऽह्नीति वचनाच्च ॥ अत्र परश्चेदिति परदिने एव मध्याह्नव्यापित्वे परा ॥ अन्यथा सर्वप
क्षेपु पूर्वा ॥ मातृयोगस्य प्रशस्तत्वात् ॥ अस्यां चन्द्रदर्शनं न कर्त्तव्यम् ॥ तथा च मार्कंडेयः ॥ सिंहा
दित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनं ॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदेति ॥ पराशरः
॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनं ॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ॥ दोष
स्य शांतये सिंहः प्रसेनमवधीदिति वै पठेत् ॥ अत्र सिंहादित्यकन्यादित्यशब्दाभ्यां चांद्रो भाद्रपद
उपलक्ष्यते ॥ श्लोकस्तु विष्णुपुराणे ॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा
रोदीस्तव ह्येष स्यमंतक इति ॥ भाद्रपदशुद्धपञ्चमी ऋषिपंचमी ॥ सा सामान्यनिर्णयात्पूर्वा

कृत्यर० ॥उत्तरत्रैवमध्याह्नव्यापित्वेउत्तरामनुष्यदैवत्यत्वेनमध्याह्नस्यकर्मकालत्वात्॥ ॥भाद्रशुक्लस
१९ प्तम्यांअमुक्ताभरणव्रतं॥ तत्रसप्तमीपूर्वविधाग्राह्या॥ षण्मुन्योरितियुग्मवाक्यात्॥ भाद्र
शुक्लाष्टमीदूर्वाष्टमी॥ साचपूर्वविधाग्राह्या॥ श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी॥ पूर्वविद्धै
ना वकर्त्तव्यैतिहद्वयमैक्यात्॥ शुक्लाष्टमीतिथिर्यस्तुमासिभाद्रपदेभवेत्॥ दूर्वाष्टमीतुसाज्ञेया
नोत्तरासा विधीयतइति॥ हेमाद्रावुदाहृतपुराणसमुच्चयवचनाच्च॥ इदंचदूर्वाव्रतंज्येष्ठामूल
योगरहितायांसिंहस्थेसूर्येऽगस्त्येऽनुदितेमध्याह्नव्यापिन्यांकर्तव्यं॥ शुक्लेभाद्रपदेमासि
दूर्वासंज्ञातुयाष्टमी॥ सिंहार्कएवकर्तव्यानकन्यार्केकदाचन॥ सिंहस्थेसोत्तमासूर्येऽनुदितेमु
निसत्तमेतिस्कांदात्॥ भाद्रपदस्याधिमासत्वेसिंहार्कएवेतिनियमात्तथात्वेमलमासेपिका
र्या॥ अगस्त्यउदितेतातपूजयेरन्नतोद्भवाम्॥ वैधव्यंपुत्रशोकंचदशवर्षाणिपंचचेतितत्रैव शिव० १९
दोषाभिधानाच्च॥ मूहेमाद्रौलोगाक्षिरपि॥ उद्यानिकाशिवपवित्रकमेषुकन्यादूर्वाष्टमीफल

धे मा १

विरूढकजागराणिस्त्रीगोत्रतानिनिखिलानीतिवार्षिकानिकुर्यादगस्त्यउदितेनशुभानिलिभु
रिति॥ मुहूर्त्तरोहिण्येष्टम्यांपूर्वावायदिवापरा॥ दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेदितिपु
राणसमुच्चयवचनाच्च॥ तथा॥ ऐंद्रर्क्षेपूजितादूर्वाहिंत्यपत्यानिनान्यथा॥ भर्तुरायुर्हरन्मूलेतस्मा
त्तांपरिवर्जयेदितिनिषेधाच्च॥ इदंचस्त्रीणांनित्यं॥ यानपूजयतेदूर्वांमोहादपिहयथाविधि॥ त्रीणि
जन्मानिवैधव्यंलभतेनात्रसंशयः॥ तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैः॥ सुखसंतानजननीभ
र्तुःसौभाग्यदायिनीतिपुराणसमुच्चयोक्तेः॥ तेनपूर्वस्यांमूलात्मतरयोगेउत्तरापितद्रहिताकर्म
कालस्पर्शिनीदूर्वाष्टमीव्रतेग्राह्या॥ नित्यत्वाच्चयस्मिन्वर्षेज्येष्ठामूलयोगरहितायाअलाभस्तत्रा
प्यनुकल्पेनानुष्ठानंनतुसर्वथात्यागः॥ अनुकल्पश्च॥ कर्त्तव्यात्वेकभुक्तेनज्येष्ठामूलंयदा
भवेत्॥ दूर्वामभ्यर्च्चयित्वातुनवंध्यंदिवसंनयेदितितत्रोक्तेः॥ ज्येष्ठामूलवर्जनंनिषिद्धकाल
मात्रस्योपलक्षणं॥ तत्राप्यपेक्षासत्वात्॥ अत्रकर्त्तव्यमुक्तंमदनरत्नेभविष्ये॥ शुचौदेशे

कृत्यर० प्रजातायां दूर्वायां ब्राह्मणोत्तमा॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत्॥ दध्यक्षतैर्द्विजश्रे
२० ष्ठ अर्घ्यं दद्यात्त्रिलोचने॥ दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धयान्वितः॥ मंत्रस्तु॥ त्वं दूर्वेऽमृतजन्मासि
वंदितासि सुरासुरैः॥ सौभाग्यं संततिं देहि सर्वकार्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि
महीतले॥ तथा ममापि संतानं देहि त्वमजरामर मिति॥ अत्र अनग्निपक्वं भक्षयेत्॥ अनग्निपक्वम
श्नीयाद्दलं दधि फलं तथा॥ अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितमिति॥ अत्र निषिद्धयोगा
भावे स्त्रीभिः स्वयं दूर्वां संपूज्य अनग्निपक्वभक्षणं कार्यं॥ तद्योगे ब्राह्मणद्वारा पूजां कारयि त्र
त्वा एकभक्तं कार्यमिति॥ अस्यामेव ज्येष्ठापूजा कार्या॥ कन्यास्थाष्टमी दूर्वाशुक्लाज्येष्ठर्क्षे
महती स्मृता॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेदिति॥ लिंगपुराणात्॥ अत्र कन्यास्थ
र्कयोगेन प्राशस्त्यमात्रं॥ मासस्तु भाद्रपदश्चांद्र एव॥ अत्राष्टम्याः खंडत्वे ज्येष्ठायुता पूर्वापि रा शिव०
बाग्राह्या यत्तु॥ ज्येष्ठानक्षत्रमात्रापेक्षं तिथिव्रताद्भिन्नं॥ ज्येष्ठायुतारूपं व्रतं तत्र यस्यां तिथौ ज्येष्ठा २०

नक्षत्रं भवति तस्यां कर्त्तव्यं॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ यस्मिन्कस्मिन्दिने वापि
ज्येष्ठादेवीं प्रपूजयेदिति स्कंदपुराणात्॥ यस्मिन्कस्मिन्दिने यस्यां कस्यां चित्तिथावित्यर्थः॥ ज्येष्ठा
नक्षत्रस्य खंडत्वे मध्याह्नादूर्ध्वं अनुवर्त्तमानं ग्राह्यं॥ यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु
॥ तस्मिन्नह्नि विधेयं स्यात्पूजा चन्द्रतान्वेत्सर्ववासर इति स्कांदात्॥ तथा॥ मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु
प्रपूजयेत्॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति॥ मंत्रस्तु॥ ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठा
यै ते नमो नमः॥ शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नम इति॥ ॥ अस्यामेव महालक्ष्मीव्रतारं
व भः॥ तत्रैषा ज्येष्ठायुता ग्राह्या॥ अलाभे केवलापि॥ भाद्रपदशुक्लाद्वादश्यां श्रवणयोगे पार
णं न कार्यं॥ आभाकासितपक्षेषु तिथिष्वेवोदितत्तवचनात्॥ उपोष्यैकादशीमोहात्पारणं श्रवणे य
दि॥ करोति हंति तत्पुण्यं द्वादशद्वादशीभवमिति स्कांदाच्च॥ अत्र त्रेधाविभक्तश्रवणमध्यभा
ग एव पारणं वर्ज्यमित्युक्तं विष्णुधर्मे॥ श्रुतेश्च मध्ये परिवर्त्तमेति सुप्तिप्रबोधपरिवर्त्तनमेव वर्ज्यं

कृत्यर० मिति ॥ अत्रैव परिवर्त्तनोत्सवं कुर्यात् ॥ श्रुतेश्च मध्ये परिवर्त्तमितीति वाक्यात् ॥ अत्रैव शक्रध्वजो
२१ त्थापनमुक्तमपरार्के गर्गेण ॥ द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे तथा ॥ शक्रमुत्थापयेद्राजा
विश्वश्रवणवासव इति ॥ द्वयमेव श्रवणद्वादशी ॥ अस्यामल्पश्रवणयोगे ऽपि तन्निमित्तमु
पवासादि भवति ॥ तदुक्तं मात्स्ये ॥ द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः ॥ न तु सा तेन
संयुक्ता तावत्येव प्रशस्यत इति ॥ तत्र एकस्मिन्नेव दिने श्रवणयोगे येन श्रवणयुता सैव ग्रा
ह्या ॥ विद्धाधिकायां दिनद्वये ऽपि श्रवणयोगे एकादशीयुता ग्राह्या ॥ द्वादशी श्रवणस्पृष्टा स्पृ
दे शेदेकादशीं यदा ॥ स एष वैष्णवो योगो विष्णुशृंखलसंज्ञितः ॥ उपोष्य विधिवत्तत्र नरः संक्षी
णकिल्बिषः ॥ प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति मत्स्यपुराणात् ॥ तथा नारदी
ये ॥ संस्पृशेदेकादशीं राजन् द्वादशीं यदि संस्पृशेत् ॥ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोह शिव०
तीति ॥ तंत्रेण च तदैकादशीप्रयुक्तमुपवासद्वयं ॥ शुद्धाधिकायां दिनद्वये ऽपि श्रवणयोगे द्वा २१

येतद्योगवती ग्राह्या ॥ उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रत इति बृहन्नारदीयात् ॥ यदा तु एकाद
श्येव श्रवणयुक्ता न द्वादशी तदा तस्यामपि व्रतं भवति ॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं ।
क्वचित् ॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्विता इति नारदीयात् ॥ विद्धाया एव श्रवणयोगे वि
द्धापि ग्राह्या ॥ दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ॥ श्रवणेन तु संयुक्ता साप्युपोष्या सर्वकाम
देति वह्निपुराणात् ॥ इयं च बुधवारे ऽतिप्रशस्ता ॥ अत्र व्रतं काम्यं ॥ नित्यमिति केचित् ॥ पारणे तु
भयांतो मुख्यं ॥ अन्यतरांतो गौणः ॥ अत्र संगमस्नानादि कार्यं ॥ भाद्रपदे श्रवणैकादश्यां मध्या
ह्ने वामनावतारः ॥ तत्र वामनपूजा प्रतिमादानादिकं व्रतकांडे द्रष्टव्यं ॥ अस्यामेव दुग्धव्रतसंक
ल्पः ॥ दुग्धे तु व्रते पायसादिकं वर्ज्यं ॥ दधिव्रतादयस्त्वधिकारात्क ग्राह्या एव ॥ ॥ भाद्रशुक्लचतुर्द
श्यामनंतव्रतं ॥ तत्र पूर्वाह्णव्यापिनी ग्राह्या दैवकर्मत्वात् ॥ चतुर्दश्यां च पूर्णिमेति युग्मवाक्याच्च ॥
केचित्तु मध्याह्ने भोज्यवेलायामिति तत्कथायां श्रवणान्मध्याह्नव्यापिनी ग्राह्येति वदंति ॥ एतस्य

कृत्यर० दृषणामन्यत्रमतस्तोऽदृष्टव्यं सिंहसंक्रांतिदिनमारभ्यैकविंशतिमेदिनेऽगस्त्योदयः॥ तदुक्तं दिवो
२२ दासीये॥ उदेतियाम्यांहरिसंक्रमाद्वैरेकाधिके विंशतिमेह्यगस्त्य इति॥ तत्रकाशपुष्पमयीम
गस्त्यप्रतिमां संपूज्य अगस्त्यः खनमान इत्यृचा अर्घ्यं दद्यादित्यादिव्रतकांडे स्पष्टं॥ भाद्रपद
पौर्णमास्यां प्रपितामहात्परांस्त्रीन्तु दिव्यश्राद्धं कार्यं॥ तदुक्तं मार्कंडेयपुराणे॥ नांदीमुखा
नां प्रत्यब्दं कन्याराशिगते रवौ॥ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति॥ नांदीमुखत्वं द
र्शितं तत्रैव पिता पितामहश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः॥
तेभ्यः पूर्वतराये च प्रजावंतः सुखेधिताः॥ तेतु नांदीमुखा नांदी समृद्धिरिति कथ्यते इति॥ ए
तच्च नित्यं॥ प्रत्यब्दमित्युक्तेः॥ एतच्च पार्वणविधानेन कार्यं॥ अथ महालयः॥ तत्र पक्षाः
॥ कृष्णप्रतिपदादि कृष्णप्रतिपदंत एकः॥ प्रतिपदादिदर्शांतो द्वितीयः॥ पंचम्यादि अष्टम्यादि द शिव०
शम्यादि चतुर्दशीवर्जं दर्शांतमित्यपरे दश सप्त पंच तिथिपक्षाः॥ एकदिनपक्षश्चेति॥ तत्र प्रथम २२

स्थि
माह शाट्यायनिः॥ नभस्यस्यापरे पक्षे तिथिषोडशकं क्षयः॥ कन्यागत[illegible]तश्चेत्स्यात्स कालः श्रा
द्धकर्मणीति॥ चेदित्यसंदिग्धे संदिग्धवचनं॥ तिथिषोडशकश्चामावास्योत्तरां प्रतिपदमादाये
ति देवलेनोक्तं॥ अहः षोडशकं यत्तु शुक्लप्रतिपदा सह॥ चंद्रक्षयाविशेषेण सापि दर्शात्मिका स्मृ
तेति॥ पंचदशादशसप्तपंचतिथिपक्षाः॥ ब्रह्मपुराणे॥ आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने
॥ त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वेति॥ तृतीयो भागस्त्रिभागः पक्षस्य॥ तद्धीनता च आ
द्यानां चतसृणां चतुर्दश्यां च वर्जयेत्॥ एवमर्द्धत्रिभागयोरपि चतुर्दशीवर्जनं॥ नभस्यस्यापरे
पक्षे श्राद्धं कुर्याद्दिने दिने॥ नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति वचनेन प्रतिपदादिपक्ष
एव चतुर्दशीविवर्जनानिषेधादितरपक्षेषु तद्वर्जनप्रतीतेः॥ नंदादिवर्जनं तु न भवति संख्याहानि
प्रसंगात्॥ गौतमः॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्॥ पंचम्यादि दशांतं अष्टम्यादि द
शम्यादि सर्वस्मिन्वेति॥ एकदिनपक्षो नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे

कृत्यर० ॥योवैश्राद्धंनरःकुर्यादेकस्मिन्नपिवासरे॥ तस्यसंवत्सरंयावत्तृप्ताःस्युःपितरोध्रुवमिति॥ अस्मिं
२३ श्चपक्षेनंदादिवर्जनमपिभवति॥ अत्रनंदादिवर्ज्जकारणाभावात्॥ नंदादिवर्जनमाहनारदः॥ नन्
दासुभृगोर्वारेरोहिण्यांचत्रिजन्मसु॥ रेवत्यांचमघायांचकुर्यान्नापरपक्षिकमिति॥ नंदाःप्रतिप
त्षष्ठ्येकादश्यः॥ त्रिजन्मानिआद्यदशमेकोनविंशानिनक्षत्राणियत्तुकर्तुश्चपुत्रदाराणांत्रि
जन्मर्क्षाणिवर्जयेदितिवचनंतद्यदिसाकरंतदेवंव्याख्येयं॥ कर्तुःपुत्रदाराणांचयानित्रीणिज
न्मर्क्षाणिआद्यदशमेकोनविंशानितानिवर्जयेदिति॥ अन्यथात्रिशब्दस्यबहुवचनस्यचवैय
र्थ्यात्॥ केचित्त्रिजन्मानीत्यत्रजन्मतत्पूर्वोत्तरनक्षत्राणीतिव्याख्यातंतत्पूर्वोत्तरनक्षत्रयोर्ज
न्मशब्दवाच्यत्वाभावादुपेक्षितं॥ अन्यत्रापि॥ नंदाश्वकामस्वारभ्भत्वग्निपित्र्यकाजभे॥ गं
डेवैधृतिपातेचपिंडाःस्युराज्याःसुतेप्सुभिरिति॥ अश्वःसप्तमीःकामस्त्रयोदशी॥ आरोभौमः शिव०
॥ अग्निपित्र्यकालभानिकृत्तिकामघाभरणपाख्यानिनक्षत्राणि॥ पिंडदानग्रहणं॥ श्राद्धोप २३

लक्षणमेवएकमूलकल्पनालाघवात्॥ अस्यापवादःप्रयोगपारिजातीयोदाहृतेसंग्रहवचने
॥ अमापातेभरण्यांचद्वादश्यांपक्षमध्यके॥ तिथिवारंचनक्षत्रंयोगंचनविचारयेदिति॥ मृ
ततिथिसमानजातीयायामपिचतुर्दशीभिन्नायांतिथौनिषेधप्रयोजकमुक्तायामपिआव
श्यकंभवंशिष्टामहालयश्राद्धमाचरंति॥ आधुनिकग्रंथवचनान्यपिलिखितानि॥ नागरखंडे
॥ आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे॥ मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः॥ त
स्यसंवत्सरंयावत्तृप्ताःपितरोध्रुवं॥ कात्यायनः॥ यातिथिर्यस्यतातस्यमृताहेतुप्रवर्तते
॥ सातिथिःपितृपक्षेतुपूजनीयाप्रयत्नतः॥ तथा॥ अशक्तःपक्षमध्येतुकरोत्येकदिनेयदा
॥ निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधीति॥ तथामार्कंडेयः॥ कन्यागतेसवितरिदिनानिद
शपंचच॥ पर्वणिनैवविधिनाश्राद्धंतत्रविधीयते॥ यस्तुविवाहेविहितेमासांस्त्यजेयुर्दशै
वहि॥ सपिंडाःपिंडनिर्वापंमौंजीबंधेषुडेवहीतिविवाहानंतरंपिंडदाननिषेधाज्योतिः॥ प

राशरेणोक्तः॥ तस्यापवादः स्मृतिसंग्रहे॥ महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि॥ यस्य कस्या
पि मर्त्यस्य सपिंडीकरणे तथा कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुत इति॥ सन्यासिनां तु म
हालयश्राद्धं द्वादश्यां कर्त्तव्यं॥ यतीनां च वनस्थानां वैष्णवानां विशेषतः॥ द्वादश्यां विहितं श्रा
द्धं कृष्णपक्षे विशेषेण इति पृथ्वीचंद्रोदये संग्रहोक्तेः॥ इदं चान्नेनैव कर्त्तव्यं मृताहं च सपिंडं च
गयाश्राद्धं महालयं॥ आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचिदिति स्मृतिदर्पणे गालवोक्तेः॥
अथात्र देवताः॥ पितरो यत्र पूज्यंते तत्र मातामहा अपि॥ तथा॥ अष्टकासु वृद्धौ च प्रतिसंव
त्सरं तथा॥ महालये गयायां च पिंसडीकरणात्पुरा॥ मातुः श्राद्धं पृथक्कुर्य्यादन्यत्र पतिना सह
॥ हेमाद्रौ महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च॥ नवदैवत्यमत्रेष्टं शेषं षाट्पौरुषं विदुरि
ति॥ सपत्नमातृकमात्रा सहैकतंत्रेण्यपणाक्षिपिनकश्राद्धवत्॥ निगमे॥ महालये गयाश्राद्धे श्रा
द्धे चान्वष्टकासु च॥ ज्ञेयं द्वादशदैवत्यं तीर्थे प्रोष्ठे मघासु च॥ तथा हेमाद्रौ॥ उपाध्यायगुरुश्वश्रु

पितृव्याचार्यमातुलाः॥ श्वशुरं भ्रातृतत्पुत्रऋत्विक्शिष्याश्च पोषकाः॥ भगिनीस्वामिदुहितृजा
मातृभगिनीसुताः॥ पितरौ पितृपत्नीनां पितुर्मातुश्च यास्वसा॥ सखिद्रव्यदशिष्याद्यास्तीर्थे चैव म
हालये॥ एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नत इति॥ तत्तं नेति संग्रहवाक्यं तु ऋषिवचनासंवा
दान्नादृतं॥ अत्र प्रत्येकोद्दिष्टं ब्राह्मणभेद इति मुख्यः पक्षः॥ अशक्तौ चतुर्विंशतिमते॥ एकस्मिन्ब्रा
ह्मणे सर्वानाचार्यादीन्प्रपूजयेत्॥ दशाद्वादशवा पिंडा नद्योकरणं न तु॥ विधवायास्तु विशे ८
षः स्मृतिसंग्रहे॥ चत्वारि पार्वणानीह विधवायाः सदैव हि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथै
व च॥ ततो मातामहानां च श्राद्धं दानं भुपक्रमेदिति॥ तथा॥ श्वश्रूणां च विशेषैस्या मातामह्यास्त
थैव चेति॥ अशक्तौ स्मृतिरत्नावल्यां॥ स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च॥ विधवा
कारयेच्छ्राद्धं यथाकालमतंद्रिता॥ विधवा स्वयं संकल्पं कृत्वान्यद्वारा कारयेदित्युक्तं प्रयोगपा
रिजाते॥ अत्र चैकः पाकः वैश्वदेवं तंत्रं॥ एकोद्दिष्टे तु पाणिहोमः॥ पुरूरवार्द्रवसंज्ञकौ विश्वे

कल्पर०
२५

दैवीयत्तु अपि कन्यागते सूर्ये श्राद्धेतु क्रूरिलोचना वित्यादि पुराणवचनं तत्काम्यवुद्ध्या क्रियमाण महा
लयश्राद्धविषय मिति मदनरत्नमदनपारिजातादयः ॥ अत्र च प्रतिदिनं प्रयोगभेदाद्दक्षिणाभेदः य
त्तु हेमाद्रिणा भ्यासपक्षेंते दक्षिणादानमित्युक्तं तत्कर्मैक्येपि प्रतिदिनं प्रयोगभेदाद्दक्षिणा लाभ्व
प्रयोगांगत्वाद्युक्तं ॥ एतच्च गुर्विणीपतिना पिंडरहितं कार्यं ॥ तथा च दक्षः ॥ मुंडनं पिंडदानं प्रेतक
र्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति ॥ जीवत्पितृकस्याप्यष्टकामात्रवार्षि
कादौ वचनाद्भवति अपिंडकश्राद्धविशेषमाह ॥ छागलेय पिंडो यत्र निवर्तेत मघ्यादिषु कथं चन
॥ सांकल्यं तु तदा कार्यं नियमाद्बल्वादिभिः ॥ श्राद्धांगतर्पणं तु पक्षश्राद्धे श्राद्धोत्तरं सकृन्महा
लयेतु परदिने ॥ तदुक्तं नारदीये ॥ पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ॥ सकृन्महालये चैव य
रेद्यनितिलोदकेमिति ॥ प्रयोगपारिजाते गर्गः ॥ कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ॥ पि
तृणां प्रत्यहं कार्यं निपितर्पणं ॥ एतच्च श्राद्धं प्रतिदिनं भवेत् ॥ पितृणां प्रत्यहं कार्यं निषिद्धेपि च शिव०
षिद्धाहे १ २५

तर्पणं ॥ एतच्च श्राद्धं नित्यं ॥ आषाढ्याः पंचमे पक्षे यः श्राद्धं न करिष्यति ॥ शाकेनापि दरिद्रोपि सोंत्यज
त्वमुपेष्यति ॥ आसनं शयनं भोज्यं स्पर्शनं भाषणं तथा ॥ तेन सार्द्धं करिष्यति ये ते पापतरा नरा इति
॥ नागरखंडे ॥ करणे प्रत्यवायश्रवणात् काम्यं च ॥ पुत्रानायुस्तथारोग्यं मैश्वर्यमतुलं तथा ॥ प्रा
प्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलानिति कार्ष्णाजिनिवचनात् ॥ मलमासेस त्युत्कर्षः यातुधान
प्रियो मासः कन्यार्के जायते यदा ॥ दैवं पित्र्यं तदा कर्म तत्र रेमासि युज्यत इति ॥ पितृमरणप्रथमा
ब्देतु कृताकृतं ॥ अत्र भरण्यां श्राद्धमति प्रशस्तं ॥ भरणी पितृपक्षे तु महती परिकीर्तिता ॥ तस्यां श्रा
द्धं कृतं येन स गयाश्राद्धकृद्भवेदिति मात्स्यात् ॥ पृथ्वीचंद्रोदये नभस्यापरं पक्षस्य द्वितीया यद्याम्य
भे ॥ तृतीया त्वग्नितारग्भिः सहिता प्रीतिदायितुरिति ॥ अस्मिन्नेव पक्षे कपिलाषष्ठी ॥ तदुक्तं वाराहे ॥ नभस्य कृष्णपक्षे तु रोहिणी पात भुसुतैः ॥ युता षष्ठी पुरा यत्नैः कपिलापरिकीर्तिता ॥ व्रतोपवा
सनियमे भस्करं तत्र पूजयेत् ॥ कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेदिति ॥ अत्रैव हस्तार्केफ

कृत्यर० लातिशयइतिनिर्णयामृते॥ इयमेवचंद्रषष्ठी॥ तदुक्तंभविष्येतद्भाद्रपदेमासिषष्ठ्यांपक्षेसितेतरे
२६ ॥ चंद्रषष्ठीव्रतंकुर्यात्सर्वविधःप्रशास्यते॥ चंद्रोदयेयदाषष्ठीपूर्वावाप्यपरेहनि॥ चंद्रषष्ठ्यांसितेप
क्षेसैवोपोष्याप्रयत्नतइति॥ अत्रैवाष्टम्यांआश्वलायनेनमाध्याद्वर्षसंज्ञंश्राद्धमुक्तं॥ एतेनमाध्या
वर्षप्रोष्ठपद्याअपरपक्षइति॥ इदंचसप्तम्यादिषुत्रिषुअहःसुअष्टकावत्कार्यमितिवृत्तिकृत॥ हु
रदत्तस्तुयद्यायुक्तवर्षासुभवंत्रयोदशीश्राद्धमितिव्याचख्यौ॥ ॥अत्रैवाष्टम्यांमहालक्ष्मी
व्रतसमापनं॥ ॥तत्रचंद्रोदयव्यापिनीग्राह्या॥ तत्कालेचंद्रार्घ्यदानविधानात्॥ चंद्रोदयव्रतले
नचंद्रोदयव्रतेचैवतिथिस्तात्कालिकीस्मृतेतिवचनात्॥ उभयत्रचंद्रोदयेतत्वेअसत्वेवाकृत्स्ना
त्वात्पूर्वा॥ यदुत्तरदिनेचंद्रोदयोत्तरंत्रिमुहूर्त्तातिदोत्तरैव॥ पूर्वावापरविद्धावाग्राह्याचंद्रोदयेबुधैः॥ सदा२
याविद्धास्फुत्रापिसापूज्यापरतश्चोर्ध्वगामिनीतिपुराणसमुच्चयवचनात्॥ अर्धरात्रमतिक्रम्यव त्रिव०
र्ततेयोत्तरातिथिः॥ तदातस्यांतिथौकार्यंमहालक्ष्मीव्रतंसदेतिवचनाच्च॥ ॥अत्रैवनवम्यामन्व २६

ष्टकाश्राद्धं॥ तत्रकात्यायनः॥ अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं॥ पित्रादिमातृमध्यंचततो
मातामहांतकं॥ हेमाद्रौछागलेयः॥ केवलास्तुक्षयेकार्याःवृद्धावपादौप्रकीर्तिताः॥ अन्वष्टकासु
मध्यस्थानांत्वाःकार्याःकदाचनेति॥ दीपिकायांतुमातुःश्राद्धमादौकार्यमित्युक्तं॥ निर्णयामृ
मैत्रायणीयगृह्यपरिशिष्टेअन्वष्टक्यंगयाप्राप्तोसत्यांयच्चमृतेइति॥ मातुःश्राद्धंसुतःकुर्या
त्पितर्यपिचजीवति॥ यद्यपिजीवत्पितृकस्यपंचाप्यन्वष्टकानित्यास्तथाप्याचारादृग्वेदस्यैय
मावश्यकीतिकेचित्॥ मातामहश्चरणेस्तुनवम्यांक्रियमाणंमातृश्राद्धंप्रतिपदिक्रियमाणं
मातामहश्राद्धंचमहालयापरपक्षनिमित्तमेवेतिकालतत्वविवेचनेसोपपत्तिकमुक्तं॥ अत्र
स्वमातरिजीवंत्यामपिसपत्नमातृभ्योदद्यात्॥ सर्वासामेवमातृणांश्राद्धंकन्यागतेरवौ॥ न
वम्यांहिप्रदातव्यंत्रस्तलब्धवराहितास्इतिकचिल्लिखितवचनेसर्वासामित्युक्तेः॥ अत्रसर्वासां
नामानिर्देशेनएकोर्घ्यःपिंडश्च॰नामैकत्वेतुविधिद्विवचनादिप्रयोगइतिवृत्तिकारः॥ भर्तृमरणे

कृत्यर० त्रं मातुः श्राद्धं न कार्यं श्राद्धं न वम्यां कुर्यात् मृते भर्त्तरि लुप्यत इति वचनादिति केचित्॥ अन्ये तु
२७ एतद्वचनस्य निर्मूलत्वात् कर्त्तव्यमित्याहुः॥ मातामहचरणास्तु मृतमित्रकेणापि तृश्राद्धदिन एव पृथ
गपृथग्वा मातृतृप्तेरपि संपादितत्वान्न कर्त्तव्यमित्याहुः॥ सर्वं चैतत्कालतत्वविवेचने स्पष्टं॥ इदं च
जीवत्पितृकोपि सपिंडकं कार्यं॥ हेमाद्रौ विष्णुधर्मोत्तरे॥ अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं त
थैव च॥ तदुपक्रम्य पिंडनिर्वपणं कार्यमित्युक्तत्वात्॥ अत्रातिदेशादेव पिंडदाने प्राप्ते जीवत्पितृक
त्वादिप्रयुक्तनिषेधप्रतिप्रसवार्थं वचनं॥ अत्र सुवासिनीभोजनमुक्तं मार्कंडेयपुराणे मातुः श्रा
द्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं॥ सुवासिन्यै प्रदातव्यमिति ज्ञानात पोब्रवीत्॥ भर्त्तुरग्रे मृता
नारी सह दाहेन वा मृता॥ तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीमिति॥ तत्रैव मदालसावाक्यं॥
स्वश्राद्धे पुत्र देयास्सु रत्नं काराश्च योषितः॥ मंजीरमेखलादामकर्णिकाकंकणद्वय इति॥ अत्रैव त्रिव०
त्रयोदशी श्राद्धं महाफलं॥ मघायुक्तायां तु अतिप्रशस्तं अत्र मलमासेपि श्राद्धं कार्यं॥ अनन्यगति २७

कत्वात्॥ मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकं॥ अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुन इति॥
कात्कगृह्योक्तेः॥ इदं च युगादिविशेषप्रयुक्तत्वात् पिंडरहितं कार्यं॥ अयनद्वितये तथा॥ युगादिषु च
कर्त्तव्यं पिंडनिर्वपणादृत इति वचनात्॥ एतच्च पुत्रवता पुत्रांतरोद्देशेन कार्यं अविभक्तैरपि
पृथक्कार्यं॥ तथा च हेमाद्रौ॥ विभक्ता वा ऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः॥ मघासु च ततोन्य
त्र नाधिकारः पृथग्विनेति॥ नित्यं चात्र श्राद्धं॥ प्रोष्ठपद्यामतीतायां तथा कृष्णत्रयोदशीमुपक्रम्य
एतानि श्राद्धकालानि नित्यानाह प्रजापतिः॥ श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यत इति विष्णुधर्मोत्त
रात्॥ इयमेव योगविशेषेण गजच्छाया॥ तदुक्तं ब्राह्मे योगे मघात्रयोदश्याः कुंजरच्छायासंज्ञक
ः॥ भवेन्मच्छायां संस्थे चंद्रे राशिन्यर्के करे स्थित इति॥ अस्मिन्नेव पक्षे चतुर्दश्यां दुर्मरणमृतानां श्रा
द्धं कार्यं॥ तथा च मरीचिः॥ विषसर्पश्वापदादितिर्यग्ब्राह्मणघातिनां॥ चतुर्दश्यां क्रियाकार्या अन्ये
षां तु विगर्हितेति॥ नागरखंडे॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा॥ उपसर्गमृतानां च विषम्

कल्प० लमुपेयुषां॥ वह्निनाचप्रदग्धानांजलमृत्युमुपेयुषां॥ सर्पव्याघ्रहतानांचशृंगेरुद्बंधनैरपि॥ श्राद्धंते
२८ षांप्रकर्त्तव्यंचतुर्द्दश्यांनराधिपेति॥ मार्कंडेयपुराणे॥ युवानःपितरोयेस्युर्मृताःशस्त्रेणवाहताः
॥ तेनकार्यंचतुर्द्दश्यांतेषांतृप्तिमभीप्सतेति॥ प्रायोनशनाभ्यांतुविधितोमृतानांभवति॥ प्रायो
नशनशस्त्राग्निविषोद्बंधनिनांतथा॥ चतुर्द्दश्यांभवेछ्राद्धमितिब्रह्मपुराणात्॥ युद्धमृतानांच॥
प्रीयंतेपितरश्चास्ययेचशस्त्रहतारणइतिवृद्धमनुस्मरणात्॥ एतच्चशस्त्रघातादिनिमित्तंचतु
र्द्दशीश्राद्धंपित्रादीनांमप्येकोद्दिष्टमेवभवति॥ नतुपार्वणं॥ तथाचगार्ग्यः॥ चतुर्द्दश्यांतुयच्छ्राद्धं
सपिंडीकरणात्परं॥ सःकोद्दिष्टविधानेनतत्कार्यंशस्त्रघातिनइति॥ पित्रादिषुत्रिष्वपिशस्त्रहते
षुशस्त्रहतेषुसर्वेषामेकोद्दिष्टान्येवकार्याणि॥ पार्वणविधायकवचनाभावात्॥ यत्तुपित्रादयस्त्र
योयस्यशस्त्रघातादिभिर्हताः॥ सभूतेपार्वणंकुर्यादाद्भिका निष्टथकृथगितिवचनंतत्सामा शिव०
णिकंग्रंथेषदर्शनादनाकरं॥ इदंचैकोद्दिष्टंसदैवकार्यं॥ प्रेतपक्षेचतुर्द्दश्यामेकोद्दिष्टविधानतः॥ २८

दैवंयुक्तंतुतच्छ्राद्धंपितृणामक्षयंभवेदिति॥ प्रयोगपारिजातोदाहृतवचनात्॥ यस्त्वेतस्यामेवचतु
र्द्दश्यांमृतस्तस्यक्षयाहनिमित्तंश्राद्धंपार्वणविधिनेवकर्त्तव्यं॥ अमैर्तस्याक्षयोयस्यप्रेतपक्षे
तथापुनः॥ पार्वणंतस्यकर्त्तव्यंनैकोद्दिष्टंकदाचनेतिविज्ञानेश्वरधृतवचनात्॥ अमावास्यायां
विशेषमाह अपरार्केयमः॥ हंसेकरस्थितेयातुअमावास्याकरान्विता॥ साज्ञेयाकुंजरछाया
इतिबोधायनोब्रवीदिति॥ ॥इतिभाद्रपदः॥ ॥आश्विनशुक्लप्रतिपदिजीवत्पितृकेणदौहि
त्रेणमातामहश्राद्धंकार्यं॥ तदुक्तंहेमाद्रौ॥ जातमात्रोपिदौहित्रोजिवत्यपिचमातुले॥ कुर्यान्मा
तामहश्राद्धंप्रतिपद्याश्विनेसितइति॥ इयंचसंगवव्यापिनीग्राह्येतिनिर्णयदीपेउक्तं॥ प्रतिपद्या
श्विनेशुक्लेदौहित्रस्त्वेकपार्वणं॥ श्राद्धंमातामहंकुर्यात्सपिताःसंगवेसितइति॥ आज्यप्रतिपद
श्राधंनांदिश्राधवदिष्यते॥ नात्यंतपाकश्रुधिस्यादामध्यान्हंविशिष्यते॥ सपितेतिविशेषणात्
जीवत्पितृकस्यैवाधिकारः॥ इदंचमुंडनंपिंडदानंचेतिदक्षवचनेनजीवत्पितृकंप्रतिपिंडदाननि

कृत्यर० २९

निधाद्नन्वष्टका॥ वच्चविशेषवचनाभावात्पिंडरहितंकार्यमितिकेचित्॥ अन्येतुनजीवत्पितृकंप्रतिपि
उदानमात्रमनेननिषिध्यते॥ किंतुदर्शश्राद्धंगयाश्राद्धंवापरपक्षिकंनजीवत्पितृकः॥ कुर्यात्तिलैः
कृष्णैश्चतर्पणमितिवचने॥ नैकवाक्यतयाश्राद्धमेवनिषिध्यतेतदाकृपगतंदर्शादिमुपलक्षणं॥ एवं
चतस्पविशेषवचनप्राप्तंश्राद्धंसपिंडमेवभवतीत्याहुः॥ अस्यामेवनवरात्रारंभः॥ तत्रव्रतस्व
रूपंभविष्योत्तरे॥ एवंचविंध्यवासिन्यांनवरात्रोपवासतः॥ एकभक्तेननक्तेनस्वशक्त्यायाचितेन
वा॥ पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे॥ गृहेगृहेशक्तिपरैर्ग्रामेग्रामेवनेवने॥ स्नातैःप्रमुदि
तैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः॥ वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः॥ स्त्रीभिश्चकुरुशार्दू
लतद्विधानमिदंस्पृष्टएविति॥ देवीपुराणेपि॥ कन्यासंस्थेरवौशुक्लामाश्विनेप्राप्यनंदिकं॥ अ
याचीत्यथवैकाशीनक्ताशीवाथवाद्यदः॥ भूमौशायीतत्वामंत्र्यकुमारीर्भोजयेन्मुदा॥ वस्त्रा शिव० २९
लंकारदानैश्चसंतोष्याःप्रतिवासरं॥ बलिंचप्रत्यहंदद्यादोदनंमांससमाषवत्॥ त्रिकालंपूजये

द्देवींजपस्तोत्रपरायणःइति॥ अत्रदेवीपूजाप्रधानंउपवासादिकमंगं॥ पूजापित्वाश्विनेमासिविशे
कोजायतेनरः इत्यादौपूजाया एवफलसंबंधादिति॥ अत्रप्रतिपदःखंडत्वेकेचिन्नावत्सरविद्धाग्राह्ये ३
त्याहुः॥ तथाहिचोक्तंमार्कंडेयदेवीपुराणयोः॥ पूर्वविद्धातुयाशुक्लाभवेत्प्रतिपदाश्विनी॥ नव
रात्रव्रतंतस्यांनकार्यंशुभमिच्छता॥ देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते॥ नंदायांदर्शयुक्ता
यांयत्रस्यान्ममपूजनमिति॥ तथा॥ अमायुक्तानकर्तव्याप्रतिपत्पूजनेमम॥ मुहूर्तमात्राक
र्तव्याद्वितियादिगुणान्विता॥ तथा॥ नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने॥ उदयेद्वितीमुहूर्ता
पिग्राह्यासोदयगामिनीति॥ शुद्धाधिकातुपूर्वैवग्राह्या॥ संपूर्णत्वादमायोगाभावाच्च॥ यदात्वा
माविद्धाप्रतिपत्त्यादिनेनास्तितदाविद्धापिग्राह्या॥ एतद्विषयाण्येवअमायुक्ताप्रकर्तव्येतिनृसिं
हप्रसादोदाहृतानिवचनानीतिमातामहचरणेस्तुमाधवहेमाद्र्याद्युक्तनक्तव्रतत्वानुरोधेन
खंडाप्रतिपत्प्रदोषव्यापिनीग्राह्येत्युक्तं॥ नक्तव्रतत्वंचननक्तभोजनरूपत्वात्॥ तस्योपासिका

ताद्दंगत्वाच्च॥ किंतुपूजारूपस्यप्रधानस्यनक्तकालमाध्यत्वात्॥ तच्चानिशिभिर्मंतिभिस्तानिराकृप
ःमूलभ्यद्यतइत्यादिसामान्यवचनात्॥ आश्विनेमासिमेघांतेप्रतिपद्यातिथिर्भवेत्॥ तस्यांनक्तं
प्रकुर्वीतरात्रौदेवींप्रपूजयेत्॥ रात्रिव्रतमिदंदेविसर्वपापप्रणाशनं॥ रात्रिव्रतमिदंतस्यरात्रौक
र्त्तव्यतेष्यतइत्यादिदेवीपुराणादिवचनेभ्यश्चावगम्यते॥ एवंचपूजारूपस्यप्रधानस्यरात्रिका
लत्वेस्थितेकर्मणोयस्ययःकालइतिवचनात्प्रदोषव्यापिनीप्रतिपन्नवरात्रव्रतेग्राह्या॥ तत्रपू
र्वदिनएवप्रदोषव्याप्तौपूर्वादिनद्वयेतद्व्याप्तावुत्तरा॥ दिनद्वयेतदव्याप्तौचपुनरेवसायाह्नरूप
गौणकालव्याप्तिलाभात्॥ यत्तुआद्यास्तुनाडिकास्त्याज्याःषोडशाद्यादशापिवा॥ अपराह्णेच
कर्त्तव्यंशुभसंततिकांक्षिभिरितिवचनं॥ तदाद्याःषोडशनाडीस्तुलंघायःकुरुतेनरः॥ कलश
स्थापनंतत्रअरिष्टंजायतेध्रुवमितिवचनांतरैकावाक्यतयाकुलाचारप्राप्तकलशस्थापनवि
षयं॥ एवंद्विधाविद्धप्रतिपद्विधायकानि।अमायुक्तनिषेधकानिवचनानिकलशस्थापनविष

याण्येच॥ अमायुक्तासदाचैवप्रतिपन्निंदितातथा॥ तत्रचेत्स्थापयेत्कुंभंदुर्भिक्षंजायतेध्रुवं
॥प्रतिपत्सद्वितीयातुकुंभारोपणकर्मणीतिरुद्रयामलवचनात्॥ यदपिप्रारंभ्यंनवरात्रंस्या
द्विनाचित्रांचवैधृतिमितिवचनंइति लाष्टं वैधृतियुक्तांचेत्प्रतिपच्चंडिकार्चने॥ तयोरंतेविधात
व्यंकलशारोपणंगृहेतिवचनात्कलशस्थापनविषयमेव॥ अत्रविशेषमाहदुर्गोत्सवेका
त्यायनः॥ प्रतिपद्याश्विनेमासिभवेद्वैधृतिचित्रयोः॥ आद्यपादौपरित्यज्यप्रारभेन्नवरात्रकं
॥भविष्ये॥ चित्रावैधृतिसंयुक्ताप्रतिपच्चेद्भवेन्नृप॥ त्याज्यास्त्वंशास्त्रयस्त्वाद्याःकार्यायांतुपू
जनमिति॥ तथा॥ नरात्रौस्थापनंकार्यंनचकुंभाभिषेचनं॥ विष्णुधर्मे॥ भास्करोदयमारभ्य
यावत्तुदशनाडिकाः॥ प्रातःकालइतिप्रोक्तःस्थापनारोपणादिषुइति॥ रुद्रयामले॥ स्नानं
मांगलिकंकृत्वाततोदेवींप्रपूजयेत्॥ शुभाभिमृत्तिकाभिश्चपूर्वंकृत्वातुवेदिकां॥ यवा
न्वापयेत्तत्रगोधूमैश्चापिसंयुतान्॥ तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्वकं॥ सौवर्णं

राजतं वा पिताम्रं मृन्मयं जंतुजेति॥ देवीपूजा च जयंतीमंत्रेण कार्या॥ जयंती मंगला काली भद्रकाली क
पालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते॥ अनेनैव तु मंत्रेण जपहोमादिकारयेदिति
॥ देवीपुराणात्॥ दुर्गालिंगको वैदिक आगमिको वा॥ तल्लिंगैः पूजयेन्मंत्रैः सर्वदेवान्समाहितस्त्व
ग्निपुराणात्॥ प्रणवादिचतुर्थ्यंतं नमोंतं नाम वा॥ नाम्ना सर्वं समापयेदिति साधारणवाक्यात्॥ पू
जा च षोडशोपचारैः पंचोपचारैर्वा अन्यैश्च राजोपचारैः छत्रचामरादिभिः॥ सा च त्रिकालं॥ प्रदो
षे विशेषेण॥ पूजानंतरं च मार्कंडेयपुराणादिगीतं देवीमाहात्म्यं पठ० ब्रूफयाद्यामाहात्म्यं भग
वत्याश्च पुराणादिषु कीर्तितं॥ पठेच्च शृणुयाद्वापि सर्वकामसमृद्धय इति वचनात्॥ तथा॥ एको
त्तराभिवृद्ध्या तु नवमीयावद्देवहि॥ चंडीपाठं जपेच्चापि जापयेद्वा विधानत इति॥ श्रवणं च ब्राह्म
णादेव कर्तव्यं॥ वाचकं ब्राह्मणं विद्यान्नान्यवर्णजमादरादिति॥ भविष्यपुराणात्॥ पौराणस्तो
त्रपाठश्च नारायणादीन्नमस्कृत्य कर्तव्यः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं

व्यासं ततो जयमुदीरयेदिति वचनात्॥ जयशब्दार्थश्च भविष्ये॥ अष्टादशपुराणानि रामस्य चरि
तं तथा॥ विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत॥ कार्ष्णं च पंचमो वेदो यन्महाभारतं स्मृतं॥ सौ
राश्च धर्मा राजेंद्र मानवोक्ता महीयते॥ जयेति नाम एतेषां प्रवदंति मनीषिण इति पाठप्रकारश्च म
त्स्यसूक्ते॥ प्रणवं चादितो जह्यात्स्तोत्रं वा संहितां पठेत्॥ अंते च प्रणवं दद्यादित्युवाचादिपुरुषः॥ सर्व
त्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्॥ शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥ न कार्यस्तत्क्रम
नसा कार्यं स्तोत्रस्य वाचनं॥ आधारे स्थापयित्वा तु पुस्तकं पूजयेत्सुधीः॥ हस्तसंस्थापनादेव य
स्मादल्पफलं भवेत्॥ स्वयं च लिखितं यच्च कृतिना लिखितं च यत्॥ अब्राह्मणेन लिखितं तच्चापि
विफलं भवेत्॥ ऋषिच्छंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षण॥ स्तोत्रेन दशपतेयत्र प्रणवन्यासमाच
रेत्॥ संकल्पितस्तोत्रपाठे सर्वं यावेमध्ये तु अध्यायं कृत्वा पठेत्सुधीः॥ अध्यायं प्राप्य विरमेन्न तु म
ध्ये कदाचन॥ कृते विरामे मध्ये तु अध्यायादि पठेत्पुनरिति॥ दुर्गामंत्रं वैदिकमागमिकं वाजयेत्तजा

कृत्यर० पयेक्षा ॥ दुर्गाग्रतोजपेन्मंत्रमेकचित्तःसमाहित ॥ इतिदेवीपुराणात् ॥ कुमारीपूजनंचप्रतिवर्षंयथाश
३२ क्तिएकवृद्ध्यादिक्रमेणकार्यंतत्प्रकारश्चदेवीपुराणे ॥ ब्रह्मोवाच ॥ नतथातुष्यतेशक्रहोमदान
जपेनतु ॥ यथासांकुमारीणांचवाससांबसुलिप्तेभूतलेरम्येतत्रताआसनेस्थिताः ॥ पूजयेद्गंधपुष्पै
श्चस्त्रग्भिश्चापिमनोरमैः ॥ पूजयित्वाविधानेनभोजनंतासुदापयेत् ॥ खंडलडुग्धगुडंसर्पिर्दधि
क्षीरंसमाक्षिकं ॥ तासांदेयंकुमारीणांशनैर्भोजययेत्तुताः ॥ पानीयंपायितंदेयमन्नंवायाचितं
शुभं ॥ तास्तृप्तास्तुयदासर्वास्तदाचाचमनंददेत् ॥ आचम्यचाक्षतान्दत्वातपाक्षंतव्यमितिस्तुत ॥
दातुःशिरसिदातव्याःकन्यकाभिरथाक्षताः ॥ तेनापिप्रणिपातश्चकर्तव्योभक्तिपूर्वकः ॥ अने
नविधिनाशक्रदेवीक्षिप्रंप्रसीदति ॥ ददातिविविधान्कामान्मनोभीष्टान्सुराधिप ॥ राज्यंरुला
ततःपश्चाद्देवलोकंचगच्छतीति ॥ स्कांदे ॥ एकैकांपूजयेत्कन्यामेकवृद्ध्यातथैवच ॥ द्विगुणंत्रिगुणं शिव०
वापिप्रत्येकंनवकंवरं ॥ नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु ॥ एकवृद्ध्यालभेत्क्षेममेकैकेनश्रियं ३२

लभेत् ॥ एकवर्षात्तुयाकन्यापूजार्थंतांविवर्जयेत् ॥ गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते ॥ द्वि
नामानि वर्षकन्यामारभ्यदशवर्षावधिक्रमात् ॥ तासांचक्रमेणकुमारिकात्रिमूर्त्तिःकल्याणीरोहिणी० ॥
काली० ॥ चंडिका० ॥ शांभवी० ॥ दुर्गा० ॥ सुभद्रेतिनामान्युक्तानिस्कांदे ॥ कुमारिकाद्विवर्षातुत्रि
वर्षातुत्रिमूर्त्तिनी ॥ चतुर्वर्षातुकल्याणीपंचवर्षातुरोहिणी ॥ षड्वर्षातुभवेत्कालीसप्तवर्षातुचंडि
का ॥ अष्टवर्षाशांभवीतुदुर्गातुनवभिःस्मृता ॥ दशवर्षासुभद्रेतिनामभिःपरिकीर्त्तिताः ॥ अ
तऊर्द्ध्वंतुयाःकन्याःसर्वकार्येषुवर्जिताः ॥ आसांक्रमेणफलान्याहुसएव ॥ दुःखदारिद्र्यना
शायशत्रूणांनाशनायच ॥ आयुष्यबलवृद्ध्यर्थंकुमारीःपूजयेन्नरः ॥ आयुःकामस्त्रिमूर्त्तिंतुत्रि
वर्गस्यफलाप्तये ॥ अपमृत्युव्याधिपीडादुःखानामपनुत्तये ॥ सौख्यधान्यधनारोग्यपुत्रपौत्रा
भिवृद्धये ॥ कल्याणींपूजयेद्धीमान्नित्यंकल्याणवृद्धये ॥ आरोग्यसुखकामस्तुधनकामीतथैवच
॥ यन्त्राकामीनरोनित्यंरोहिणींपरिपूजयेत् ॥ विद्यार्थीचराज्यार्थीचविशेषतः ॥ शत्रूणांचवि

चामयार्थी

नाशार्थीकालिकांपूजयेन्नरः॥संग्रामेजयकामीचचंडिकांपरिपूजयेत्॥दुःखदारिद्र्यनाशायनृपसं
मोहनायच॥महापापविनाशायशांभवीचप्रपूजयेत्॥सचलोकूटशत्रूणामुग्रसाधनकर्मणि॥दु
र्गांदुर्गतिनाशायपूजयेद्यत्नतोबुधः॥सौभाग्यधनधान्यादिवांछितार्थफलाप्तये॥सुभद्रांपूजये
न्मर्त्योदासीदासविवृद्धये॥पूजाप्रकारश्चतत्रैव॥प्रातःकालेविशेषेणकृताभ्यंगोविशेषतः॥आ
वाहयेत्ततःकन्यांमंत्रेणानेनभार्गव॥मंत्राक्षरमयींलक्ष्मींमातॄणांरूपधारिणीं॥नवदुर्गात्मिकां
साक्षात्कन्यामावाहयाम्यहं॥आवाहनमंत्रः॥ततःसंपूजयेद्धीमान्मंत्रैरेभिःपृथक्पृथक्॥पू
जामंत्रः॥जगत्पूज्येसर्ववंद्येसर्वशक्तिस्वरूपिणि॥पूजांगृहाणकौमारिजगन्मातर्नमोस्तुतेकु
मार्यै॥त्रिपुरांत्रिपुराधारांत्रिवर्गज्ञानरूपिणीं॥त्रैलोक्यवंदितांदेवींत्रिमूर्तिंपूजयाम्यहं॥त्रिमूर्त्यै
॥कलात्मिकांकलातीतांकारुण्यहृदयांशिवां॥कल्याणजननींनित्यंकल्याणींपूजयाम्यहं॥
कल्याण्यै॥अणिमादिगुणाधारामकाराद्यक्षरात्मिकां॥अनंतशक्तिकांलक्ष्मींरोहिणींपूज

याम्यहं॥रोहिण्यै॥कामचारींशुभांकांतांकालचक्रस्वरूपिणीं॥कामदांकरुणोदारांकालींसं
पूजयाम्यहं॥काल्यै॥चंडवीरांचंडमायांचंडमुंडप्रभंजिनीं॥पूजयामिसदादेवींचंडिकांचं
डविक्रमां॥चंडिकायै॥सदानंदकरींशांतांसर्वदेवनमस्कृतां॥सर्वभूतात्मिकांलक्ष्मींशां
भवींपूजयाम्यहं॥शांभव्यै॥दुर्गमेदुस्तरेकार्येभवदुःखविनाशिनीं॥पूजयामिसदाभ
क्त्यादुर्गांदुर्गतिनाशिनीं॥दुर्गायै॥सुंदरींस्वर्णवर्णाभांसुखसौभाग्यदायिनीं॥सुभद्रांजन
नींदेवींसुभद्रांपूजयाम्यहं॥सुभद्रायै॥एवमभ्यर्चनंकुर्यात्कुमारीणांप्रयत्नतः॥कंचुकै
श्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः॥नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः॥हीनाधि
कांगींकुष्ठादिविकारांकुकुलांतथा॥ग्रंथिस्फुटितगर्भांगींरक्तास्यव्रणांकितां॥जात्यंधांके
करींकाणांकुरूपांतनुरोमशां॥संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवां॥अरोगिणींसुपुष्टां
गींसुरूपांव्रणवर्जितां॥एकवंशसमुद्भूतांकन्यांसम्यक्प्रपूजयेत्॥ब्राह्मणींसर्वकार्येषुपूज

यार्थेनृपवंशजां॥ लाभार्थेवैश्यवंशगेत्थां सुतार्थेशूद्रवंशजां॥ दारुणेचात्यजातीनां पूजयेद्विधिना
नरइति॥ कश्चित्तुसुवासामेकएवमंत्रउक्तः॥ मंत्राक्षरमयींलक्ष्मींमातृणांरूपधारिणीं॥ नवदुर्गा
त्मिकां॥ नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहमिति॥ अत्रवेदपारायणमुक्तंरुद्रयामले॥ ए
वंचतुर्वेदविदोविप्रान्सर्वान्प्रसादयेत्॥ तेषांवैचरणंकार्यंवेदपारायणायवै॥ इति॥ तथादेवीपु
राणे॥ यस्मिन्दिवसेकुर्याच्चंडिकापूजनादिकं॥ द्विगुणंतद्द्वितीयेह्नित्रिगुणंतत्परेहनि॥ नवमीति
थिपर्यंतंदद्यात्पूजाजयादिकमिति॥ अशक्तोपूजादिकमन्येनकारापियां॥ स्वयंवाप्यन्यतो
वापिपूजयेत्पूजयीतवेतिदेवीपुराणात्॥ इदंचस्मृतिकालादावपिकार्यं॥ नदोषमुक्तेतथाजीवे
सिंहस्थेविवृहस्पतौ॥ कार्याचैवस्वदेवाचपत्यइंकुलधर्मतइतिधर्मप्रदीपात्॥ अत्रसाम्बस्य
मभ्यपूजनमुक्तंमदनरत्नोदाहृतेदेवीपुराणे॥ अश्वयुक्शुक्लप्रतिपत्स्वातियुक्तेसुशोभने॥
पूर्वमुच्चैःश्रवानामप्रथमंसूर्यमावहेत्॥ तस्मात्साश्वैर्नरैस्तत्रपूज्योसौश्रद्धयान्वितैः॥ पूजनीया

श्वतुरगानवम्यांयावद्देवद्वि॥ शांतिस्वस्त्ययनंकार्यंतदातेषांदिनेदिने॥ धान्यंभल्लातकंकुष्टंवचासिद्धा
र्थकांस्तथा॥ पंचरंगेणसूत्रेणाकंठेतेषांतुबंधयेत्॥ वायव्यैर्वारुणैःसौरैःशाक्रैर्मंत्रैःसवैष्णवैः॥ वै
श्वदेवैस्तथाग्नेयैर्होमःकार्योदिनेदिने॥ तुरंगारक्षणीयास्तुपुरुषैःशस्त्रपाणिभिः॥ दारिस्थतःक्वचि
त्तत्रनचवाह्याःकथंचनेति॥ तथा॥ ज्येष्ठायोगेपुरातत्रगजाश्वाश्चैमहाबलाः॥ पृथिवीमवहन्पूर्वंस
शैलवनकाननां॥ कुमुदैरावणःपद्मःपुष्पदंतोथवामनः॥ सुप्रतीकोंजनोनीलस्तस्मात्तांस्तत्रपू
जयेत्॥ शाकादक्षात्क्रमारभ्यनवम्यंतंचपूर्ववदिति॥ प्रतिपदादिपूजाप्रकारविशेषोभविष्ये॥ के
शसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिने॥ पट्टडोरंद्वितीयायांकेशसंयमहेतवे॥ दर्पणंचतृतीयायां
सिंदूरालक्तकंतथा॥ मधुपर्कंचतुर्थ्यांतुतिलकंनेत्रमंडनं॥ पंचम्यामंगरागंचशक्त्यालंकरणानि
च॥ षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेत्॥ सप्तम्यांप्रातरानीयगृहमध्येप्रवेशयेत्॥ उपो
षणमथाष्टम्यामात्मशक्त्याचपूजनं॥ नवम्यामुग्रचंडाध्यःपूजांकुर्याद्बलिंतथा॥ संपूज्यप्रेषणं

कृत्यर॰ कुर्याद्दशम्यांशावरोत्सवैः॥ अनेनविधिनायस्तुदेवींप्रीणयतेनरः॥ स्कंदवसालयेत्तंतुदेवीसर्वाय
३५ दिस्थितमिति॥ अत्रस्त्रीणांविशेषः॥ मनुः पुष्पालंकारवस्त्राणिगंधधूपानुलेपनं॥ उपवासेनदु
ष्यंतिदंतधावनमंजनं॥ हेमाद्रौगारुडे॥ गंधालंकारतांबूलपुष्पमाल्यानुलेपनं॥ उत्तरार्द्धंपूर्वव
त्॥ मात्स्ये॥ अंतरात्तुरजोयोगेपूजामन्येनकारयेत्॥ एवमाशौचेपि॥ सूतकाद्याकस्मारब्धम
नेकाहंतुयद्व्रतं॥ कायिकंतत्तुकुर्वीतनतुदानार्चनंजपं॥ सूतकाद्हेतुयत्किंचिद्दानाद्यंतरितंभवे
त्॥ सूतकानंतरेलक्षितकर्तव्यमतंद्रितैरितिवचनात्॥ आश्विनशुक्लपंचम्यामुपांगललाग
ललिताव्रतं॥ तत्रपंचमीपूर्वविद्धैवग्राह्या॥ युगभूतानामितियुग्मवाक्यात्॥ अस्यचभुक्ताजाग
रणरूपत्वेनभुक्ताजागरणेनक्केचंडाद्यधिव्रतेतथा॥ नारात्रतेषुसर्वेषुरात्रियोगोविशिष्यइति द्विव॰
हेमाद्रिधृतवचनाच्च॥ अस्मिन्पक्षेमूलनक्षत्रेसरस्वतीस्थापनमुक्तंदेवीपुराणे॥ मूलेषु ३५
स्थापनंदेव्याःपूर्वाषाढासुपूजनं॥ उत्तरासुवलिंदद्याच्छ्रवणेनविसर्जयेदिति॥ रुद्रयामले॥

मूलेनृक्षेसुराधीशेपूजनीयासरस्वती॥ पूजयेत्सततंदेवयावद्वैष्णवमृक्षकं॥ नाध्यापयेन्नचलि
खेन्नाधीयीतकदाचन॥ पुस्तकेस्थापितेदेवविद्याकामोद्विजोत्तमइति॥ ॥ षष्ठ्यादिपक्षोप्युक्तः॥
कालिकापुराणे॥ बोधयेद्बिल्वशाखायांषष्ठ्यांदेवींफलेषुच॥ सप्तम्यांबिल्वशाखांतामाहृत्यप्रति
पूजयेत्॥ पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत्॥ जागरंचस्वयंकुर्याद्बलिदानंमहानिशि॥
प्रभूतबलिदानंचनवम्यांविधिवच्चरेत्॥ ध्यायेद्दशभुजांदेवींदुर्गामंत्रेणपूजयेत्॥ विसर्जनंदश
म्यांतुकुर्याद्वैशार्करोत्सवैः॥ धूलीकर्दमनिक्षेपैःक्रीडाकौतकमंगलैः॥ भगलिंगाभिधानैश्चभ
गप्रगीतकैरिति॥ देवीपुराणे॥ ज्येष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्रणं॥ सप्तम्यांमूलयुक्ता
यांपत्रिकायाःप्रवेशनं॥ पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं॥ उत्तरेणानवम्यांतुबलिभिः
पूजयेच्छिवां॥ श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेदिति॥ अत्रतत्तत्तिथीनांतत्तन्नक्षत्रयोगःसंभवे
फलातिशयार्थः नतुसएवादरणीयः॥ तदुक्तंलैंगे॥ मूलाभावेपिसप्तम्यांकेवलायांप्रवेशयेत्॥ त

यातिथ्यंतरेषेवमृक्षेत्त्रेफलोच्चयः॥देवलः॥तिथिनक्षत्रयोर्योगेद्वयोरेवानुपालनं॥योगाभावेतिथि
र्ग्राह्यादेव्याःपूजनकर्मणीति॥भविष्योत्तरेपि॥त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रममिति॥अष्ट
मीनवम्योरेववापूजनंकर्त्तव्यं॥अष्टम्यांवानवम्यांचजन्ममोक्षप्रदांशिवां॥पूजयित्वाश्विनेमासि
विशोकोजायतेनरइतिवचनात्॥केवलाष्टमीपूजोक्ताब्राह्मे॥तत्राष्टम्यांभद्रकालीदक्षयज्ञविना
शिनी॥प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसह॥अतोर्थंपूजनीयासातस्मिन्नहनिमानवैः॥उ
पोषितैर्धूपदीपवस्त्रैर्माल्यानुलेपनैरिति॥अयंचकेवलाष्टम्युपवासःपुत्रवतोनिषिद्धः॥उपवा
संमहाष्टम्यांपुत्रवान्नसमाचरेत्॥यथातथैवपूतात्माव्रतीदेवींविसर्जयेदितिकालिकापुराणा
त्॥केवलनवमीपूजाभविष्ये॥लब्धाभिषेकावरदाशुक्लेचाश्वयुजस्यच॥तस्मात्तस्यांतत्रसंपू
ज्यानवम्यांचंडिकाबुधैरिति॥उपवासोप्यस्यामुक्तः॥तस्मादियंमहापुण्यानवमीपापना
शिनी॥उपोष्यातुप्रयत्नेनसततंसर्वपार्थिवैरिति॥पत्रिकापूजायांआश्विनशुक्लनवम्यांबो

धतास्मामर्थ्येनवरात्रांतर्गतषष्ठ्यांतत्कर्त्तव्यं॥षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेदितिभवि
ष्यवचनात्॥अतएवषष्ठीसायंसंध्याव्यापिनीग्राह्या॥आमंत्रणंतुपत्रीप्रवेशाव्यवहितपूर्वदि
नेकार्यं॥तदुक्तंब्रह्मांडे॥पत्रीप्रवेशगत्सर्वेयुःसायाह्नेबिल्ववासिनीं॥चंडीमामंत्रयेद्विद्वान्नात्रष
ष्ठीपुरस्क्रियेति॥मत्स्यसूक्ते॥ज्येष्ठावाप्यथवाषष्ठीसायंकालेभवेद्भवेत्॥सायमेवतथापिस्याद्बि
ल्वशाखाभिमंत्रणं॥पूर्वांषष्ठींसनक्षत्रांसायंप्रातामपित्यजेत्॥यदातुपत्रिकापूजानपरेद्युर्भ
विष्यति॥संनिकृष्टंतुयत्सर्वंपत्रिकादिवसस्यतु॥तद्दिनेवरणंकृत्वापरेद्युःसंप्रवेशयेदिति॥प
त्रिकापूजायांसप्तम्यादितिथित्रयंप्रातःकालीनमुत्तरोत्तरतिथिविद्धमेवग्राह्यं॥भगवत्याःप्र
वेशादिविसर्गांताश्चयाःक्रियाः॥तिथावुदयगामिन्यांसर्वास्ताःकारयेद्बुधइतिनंदिकेश्वरपुरा
णात्॥अष्टमीतुपत्रीपूजातिरिक्तेपिदेवीपूजनेनवमीविद्धैवग्राह्या॥वसुरंध्रयोरितियुग्मवाक्या
त्॥वारंमहाष्टमीपूज्यानवमीसंयुतासदा॥सप्तमीसंयुतानित्यंशोकसंतापकारिणी॥सप्तमी

त्वाष्ट्रसंयुक्तांमोहादज्ञानतोपिवा॥ महाष्टमीप्रकुर्वाणोनरकंप्रतिपद्यतइतिमदनरत्नधृतस्मृति
संग्रहाच्च॥ स्मृतिसमुच्चये॥ सप्तमीत्वाष्ट्रसंविद्धावर्जनीयासदाष्टमी॥ स्तोकापिसातिथिःपुण्या
यस्यांसूर्योदयोभवेत्॥ दुर्गोत्सवे॥ मूलेनापिहिसंयुक्तासदात्याज्याष्टमीबुधैः॥ लेशमात्रेणस
प्तम्यामपिस्याद्यदिदूषिता॥ अतएवगौरीतृतीयावदेवअष्टम्यासप्तमीयोगेनत्याज्यत्वं॥ अल्पा
याअप्युत्तरस्याअष्टम्यासप्तमीयोगेनत्याज्यत्वं॥ अल्पायाअप्युत्तरस्याअष्टम्याग्राह्यत्वंद्रष्ट
व्यं॥ यदातुपरदिनेनवमीसूर्योदयंनस्पृशतितदाष्टमीसप्तमीविद्धैवग्राह्या॥ यदासूर्योदयेन
स्यान्नवमीचापरेहनि॥ तदाष्टमींप्रकुर्वीतसप्तम्यासहितांनृपेतिस्मृतिसंग्रहात्॥ तथाचअहंभ
द्रावभञ्जनतावयोरंतरंक्वचित्॥ तस्माद्धिसप्तमीविद्धाकार्यादुर्गाष्टमीतिपिरित्यादीनिवचनानिए
तद्विषयाण्येव॥ कुर्यंचभौमेतिप्रशस्ताअष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत्॥ कुजवारेभिवेत्तत्र
पूजनीयाप्रयत्नतइतिमदनरत्नधृतवचनात्॥ अत्रविशेषेणपूजाकार्या॥ पुनःपुजांतथाष्टम्यां

विशेषेणसमाचरेत्॥ जागरंचस्वयंकुर्याद्बलिदानंमहानिशीति॥ कालिकापुराणात्॥ तथा॥ पशु
घातःप्रकर्त्तव्योयवलाजवधस्तथा॥ तथा॥ देवींतुपूजयत्तायेअर्द्धरात्रेष्टमीषुच॥ घातयंतिपशू
न्भक्तातेभवंतिमहाबला॥ बलिंचयेप्रयच्छंतिसर्वभूतविभाशनं॥ तेषांतुतुष्यतेदेवीयावत्कल्पंतु
शांकरमिति॥ इदंचबलिदानंअग्नीषोमीयपशुहिंसान्यायेनधर्म्यमपिक्षत्रियादिपरमेव॥ ब्राह्म
णस्यतुसात्विकीजपयज्ञाद्यैर्नैवेद्यैश्वनिरामिषैरितीयमेवपूजाभवति॥ तस्यसात्विककर्मस्वेवा
धिकारस्यभगवद्गीतादिषुप्रसिद्धत्वात्॥ स्पष्टमेतदुक्तंदेवीपुराणे॥ नदर्ययामिनीशेषेविजयार्थं
नृपोत्तमः॥ पंचाब्दंलक्षणोपेतंगंधधूपस्रगर्च्चितांविधिवत्कालिकालीतिजप्त्वाखड्गेनघातयेदि
ति॥ एवंसुरयास्वगात्ररुधिरेणचपूजाब्राह्मणस्यचभवति॥ स्वगात्ररुधिरंदत्वाब्रह्महत्यामवाप्नु
यात्॥ मद्यंदत्वाब्राह्मणस्तुब्राह्मण्यादेवहीयतइतिकालिकापुराणात्॥ माषभक्तादिनातुब
लिदानंब्राह्मणस्यभवति॥ माषकुल्माषमांसाद्यैर्देयोदिक्षुबलिर्निशि॥ कूष्मांडमिक्षुदंडश्चम

कृत्य र०
३८

धर्मास्सवएवच॥ एतेवलिसमाख्यातास्तेषोछागसौम्यास्मृताइतिकालिकापुराणात्॥ रुद्रयामलेछा
गभावेतुकूष्मांडंश्रीफलंनामनोहरं॥ वस्त्रसंवेष्टितंकृत्वाछेदयेछुरिकादिनेतिहोमस्तु॥ पूर्वाषा
ढायुताष्टम्यांपूजाहोमाद्युपोषणमित्यष्टम्यां॥ नवम्यांवलिदानंचकर्त्तव्यंचयथाविधि॥ जपंहो
मंचविधिवत्कुर्यात्तत्रविभूतयेइतिनवम्यांचविधानात्शिष्टसमाचाराच्च अष्टम्यामारभ्यनव
म्यांसमापनीयोनवम्यामेववाकार्यः॥ होमद्रव्यंचाज्यतिलादि॥ पूजयेत्तिलहोमैश्चदधिक्षीर
घृतादिभिर्देवीपुराणात्॥ मंत्रश्चजयंतीत्यादिः॥ अनेनैवतुमंत्रेणजपहोमादिकारयेदिति
देवीपुराणात्॥ केचित्तुमार्कंडेयपुराणगतसप्तशतीस्तवेनप्रतिश्लोकंस्वाहाकारांतेनतिल
सर्पिर्मिश्रपायसेनहोमंकुर्वंति॥ प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिषेतिरहस्याख्यग्रंथ
वचनंतत्रप्रमाणमुपन्यस्येति॥ रुद्रयामलेपि॥ प्रधानद्रव्यमुद्दिष्टंपायसान्नंतिलास्तथा॥ शिव०
किंशुकैःसर्षपैःपुष्पैर्लाजादूर्वांकुरैस्तथा॥ यवैर्वाश्रीफलैर्दिव्यैर्नानाविधफलैस्तथा॥ रक्त ३८

चंदनखंडैश्चगुग्गुलैश्चमनोहरैः॥ प्रतिश्लोकंचजुहुयात्सर्वद्रव्याणिचक्रमात्इति॥ ॥इतिहोमेष्ट
मी॥ ॥अथनवमी॥ ॥साचअष्टमीविद्धाग्राह्या॥ युग्मवाक्यात्॥ श्रावणीदुर्गनवमीतथापूर्वाष्टमीव
या॥ पूर्वविद्धैवकर्त्तव्याशिवरात्रिर्वलेर्दिनमितिरुद्रयामवचनाच्च॥ तथा॥ अश्वयुक्शुक्लपक्षेय
ष्टमीमूलेनसंयुता॥ सामहानवमीप्रोक्तेति॥ अस्यांपूजाहोमादिकृत्वाप्रभूतवलिदानंकार्यं॥ प्रभू
तवलिदानंचनवम्यांविधिवच्चरेदितिकालिकापुराणात्॥ यदातुनवमीअष्टमीविद्धाभूत्वाद्वितीयदि
नेपिक्रियतीभवतितदानवमीप्रयुक्तस्यपूजादेः॥ पूर्वदिनेनुष्ठानेपिमहावलिदानमात्रंद्वितीयदि
नेकर्त्तव्यं॥ अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत्॥ प्रधानेवलिदानेतुक्रियन्मात्रापिलभ्यते॥ नव
म्यांतत्रसंपूज्यादुर्गांदुर्गार्त्तिनाशिनीमितिवचनात्॥ अत्रपूजावलिदानरूपैव॥ सूर्योदयेपरारिक्तापू
र्णास्यादपरायदि॥ वलिदानंप्रकर्त्तव्यंतत्रदेव्याःशुभावहं॥ वलिदानेकृतेष्टम्यांराष्ट्रभंगोभवेन्नृपेति
देवीपुराणात्॥ इदंचवलिदानंनवमीप्रयुक्तं॥ अष्टमीप्रयुक्तस्यतत्रैवकर्त्तव्यत्वात्॥ द्वितीयदिनेनव

कृत्यर०
३९

स्याअलाभेतुपूर्वेद्युरेवनवमीमिश्रेकार्यं॥दशम्यांवधिदानंतुदीयतेयत्रमानवैः॥तद्राष्ट्रंनाशमा
यातिमरकोयंडवैःस्फुटमितिभविष्ये॥नवमीप्रयुक्तस्यबलिदानस्यदशम्यांकरणेदोषश्रवणात्
॥एवंनवम्यांहोमकुमारीपूजनब्राह्मणभोजनादिकृत्वादक्षिणामाचार्यायदद्यात्॥नवम्यां
पूर्ववसस्ताकर्तव्याश्रुतिमिच्छता॥दक्षिणांवस्त्रयुग्मंचआचार्यायनिवेदयेदिमत्स्यसूक्तात्॥वि
सर्जनंतुदशम्यामेवकार्यं॥संपूज्यप्रेषणंकुर्याद्दशम्यांशावरोत्सवैरितिभविष्यपुराणात्॥ततः
संप्रेषितादेवीदशम्यांशावरोत्सवैरितिकालिकापुराणाच्च॥पारणस्यापिनियमत्यागरूपस्यवि
सर्जनोत्तरकालत्वात्तदपिविसर्जनोत्तरंदशम्यामेवकर्तव्यं॥अतएवहेमाद्रौधौम्यवचनेन
वमीपर्यंतंव्रतमुक्तं॥आश्विनेशुक्लपक्षेतुकर्तव्यंनवरात्रकं॥प्रतिपदादिक्रमेणैवयावच्चन
वमीभवेतदिति॥नवमीतिथिपर्यंतंवृध्यापूजाजपादिकमितिच॥एवंचर्विध्यवासिन्यांनवरा निव०
त्रोपवासइतिभविष्योत्तरेच॥यत्तुआश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः॥नवम्यांपारणंकु ३९

र्याद्दशमीमिश्रितान्वेदितिब्राह्मनाम्नाकेनचिल्लिखितंवचनंतदनाकरं॥साकरंचेद्गौडाभि
सारिकविषयंतस्याष्टमीपर्यंतत्वोक्तेः॥अत्रसूतकादौपारणाकार्येत्युक्तंरुद्रयामले॥सूतके
पारणंकुर्यान्नवम्यांहोमपूर्वकं॥तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितइति॥अंगिरास्तुनका
र्यमित्याह॥नियमस्थायदानारीप्रपश्येदंतरारजः॥उपोष्यैवतुतारात्राःस्नात्वाशेषंचरेद्व्रतमि
ति॥अन्यत्रापि॥नियमस्थाव्रतस्थाचरजःपश्येत्कथंचन॥त्रिरात्रंतुक्षपेदूर्ध्वंव्रतशेषंसमाप
येदिति॥अत्राशौचग्रहणंरजोग्रहणस्यचोपलक्षणं॥एवंवाचरतोव्यवस्थेतिकेचित्॥सर्वेषां
निमूर्लत्वचारिकादशीव्रतवदत्रापिसूतकमध्येपारणंकर्त्तव्यमित्यन्ये॥ममतुप्रतिभातिअ
त्रनवरात्रेहोमस्यपूजापरत्वेनप्रधानत्वात्तस्यचनित्यसाध्यत्वेनाशौचेअसंभवात्॥नतुदा
नार्चनजपनिषेधात्तत्समासिविनानियमरूपोपवाससमाप्त्यसंभवादाशौचांतेहोमादिपूर्वकं
पारणंकर्त्तव्यंप्रामिनशिष्टाचारोप्येवमेव॥प्रतिमापूजाविधिपत्रिकापूजाविधिश्चान्यत्रमत्कृ

कृत्यर॰
४०

तोद्रष्टव्यः॥ विस्तरभयान्नलिख्यते॥ इयमेवविजयदशमी॥ इयंचयदिश्रवणयुक्तातदैवो
त्तरा॥ उदयेदशमीकिंचित्संपूर्णैकादशीयदि॥ श्रवणर्क्षेयदाकार्यासातिथिर्विजयाभिधा॥ श्रवण
र्क्षेतुपूर्णायांकाकुत्स्थःप्रस्थितोयतः॥ उल्लंघयेयुःसीमानंतद्दिनर्क्षेततोनराइतिकश्यपव
चनात्॥ संपूर्णैकादशीतिवचनात्तदाकर्मकालव्याप्तिरयिन्नापेक्षिता॥ अन्यथासर्वपक्षेषु
पूर्वादशम्यांतुजनैःसम्यक्पूजनीयापराजिता॥ ऐशानींदिशमाश्रित्यअपराह्णेप्रयत्नतइत्य
पराह्णस्यकर्मकालत्वाभिधानात्॥ अस्यांराजाअथातःप्रस्थानंव्याख्यास्यामइत्यादिनागोपथ
ब्राह्मणोक्तंप्रास्थानिकविधिंकृत्वातदुक्तंप्रकारेणापराजितापूजांकुर्यात्॥ तत्प्रकारश्चमदन
रत्नादौद्रष्टव्यः॥ सर्वैश्चजनास्तस्यामपराह्णेऐशानींदिशमाश्रित्यसीमानमुल्लंघ्यअपराजितां
पूजयेयुः॥ सांचेवंअद्याश्विनशुक्लदशम्यांक्षेमसिध्यर्थंअपराजितापूजांकरिष्यइतिसंकल्प्य त्रि॰ ४०
चंदनादिलिखिताष्टदलमध्येअपराजितायैनमइत्यपराजितांतद्दक्षिणतः॥ क्रियाशक्त्यैनम

इतिजयंतेवामतः॥ उमायैनमइतिविजयांप्रतिष्ठाप्य ॐअपराजितायैनमः॥ ॐजयायैनमः॥
ॐविजयायैनमः॥ इत्यावाहनाद्युपचारैः॥ संपूज्यप्रणम्यइमांपूजांयथादेवियथाशक्त्यानिवेदि
तां॥ रक्षार्थंतुसमादायव्रजस्वस्थानमुत्तमामितिविसर्जयेयुः॥ आचाराच्छमींपूजयित्वाअमंग
४ शमंनी लानांशमनींदुष्कृतस्यच॥ दुःस्वप्ननाशनींधन्यांप्रपद्येहंशमींशुभामितितांप्रार्थयेयुः॥ क्वचिद
न्येपिमंत्राः॥ शमीशमयतेपापंशमीलोहितकंटका॥ धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी
॥ करिष्यमाणयात्रायांयथाकालंसुखंमया॥ तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजितेइति॥ त
था॥ गृहीत्वासाक्षतामार्द्रांशमीमूलगतांमृदं॥ गीतवादित्रघोषेणतामानयेत्स्वगृहंप्रति॥ ततो
भूषणवस्त्रादिधारयेत्स्वजनैःसहेति॥ ज्योतिषे॥ कृत्वानीराजनंराजाबलवृद्ध्यै यथाक्रमं॥
शोभनंखंजनंपश्येज्जलगोगोष्ठसंनिधाविति॥ ॥इतिविजयादशमी॥ ॥आश्विनशुक्लैकाद
श्यांकार्तिकस्नानारंभउक्तः॥ पाद्मेकार्तिकमाहात्म्ये॥ आश्विनस्यतुमासस्ययाशुक्लैका

कृत्यर०
४१

दशीभवेत् ॥ कार्त्तिकस्यव्रतानीहतस्यांवैप्रारभेत्सुधीरिति ॥ विष्णुनात्तुतुलासंक्रांतिमारभ्यक
र्त्तव्यमित्युक्तं ॥ तुलामकरमेषेषुप्रातःस्नायीसदाभवेत् ॥ हविष्यंब्रह्मचर्यंचमहापातकना
शनमिति ॥ पूर्णमाश्वयुजेमासिपूर्णमास्यांसमाहितः ॥ शुक्लामासंसमयंपरयाचभक्त्यासमा
प्यतेकार्त्तिकपौर्णमास्यामितिहेमाद्रिलिखितमादित्यपुराणंपूर्णिमारंभेप्रमाणं ॥ काशीखंडे ॥
व्रातंसमास्तपस्तप्त्वाकृतेयत्समवाप्यते ॥ तत्कार्त्तिकेपंचनदेसकृत्स्नानेनलभ्यते ॥ कार्त्तिकेविं
दुतीर्थेयोब्रह्मचर्यपरायणः ॥ स्नास्यत्यनुदितेभानौभानुजात्तस्यधीःकुतइति ॥ स्नानमंत्र
ः ॥ कार्त्तिकेहंकरिष्यामिप्रातःस्नानंजनार्दन ॥ प्रीत्यर्थंतवदेवेशदामोदरमयासहेति ॥ अर्घ्यमं
त्रः ॥ काशीखंडे ॥ व्रतिनःकार्त्तिकेमासिस्नातस्यविधिवन्मम ॥ गृहाणार्घ्यंमयादत्तंदनुजेंद्र
निषूदन ॥ नित्यनैमित्तिकेकृष्णकार्त्तिकेपापनाशने ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ॥ त्रिव०
इमौमंत्रौसमुच्चार्यनरोयोर्घ्यंप्रयच्छति ॥ सुवर्णरत्नपुष्पाद्यपूर्णतांसेनपुण्यवान् ॥ सुवर्णपूर्ण ४१

पृथिवीतेनदत्तानसंशयइति ॥ संपूर्णस्नानात्राक्तौब्रह्मपुराणे ॥ कार्त्तिकमधिकृत्य ॥ एकादश्या
दिषुतथातत्रपंचसुरात्रिषु ॥ दिनेदिनेचस्नातव्यंशीतलासुनदीषुचवर्जितव्यातथाहिंसामांसभ
क्षणमेवचेति ॥ काशीखंडे ॥ वाराणस्यांपंचनदेत्र्यहस्नानात्तुकार्त्तिके ॥ अमीतेपुण्यवपुषःपुण्य
भाजोतिनिर्मलाइति ॥ तत्रैव ॥ कार्त्तिकेमासिमेयात्रायैःकृताभक्तितत्परैः ॥ विंदुतीर्थकृतस्नानै
स्तेषांमुक्तिर्नदूरतः ॥ पाद्मे ॥ कार्त्तिकेनार्चितोयैस्तुकमलैःकमलेक्षणः ॥ जन्मकोटिषुविप्रेंद्रनते
षांकमलागृहे ॥ नारसिंहे ॥ विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं ॥ कार्त्तिकेयोर्चयेद्भक्त्यावाज
पेयफलंलभेत् ॥ पाद्मे ॥ तुलसीदललक्षेणकार्त्तिकेयोर्चयेद्धरिं ॥ पत्रेपत्रेमुनिश्रेष्ठलभतेमौक्ति
कंफलं ॥ स्कांदे ॥ निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां ॥ वहतेयोनरोभक्त्यातस्यनैवास्तिपातकं
॥ विष्णुधर्मे ॥ स्पृशंतियानिलोमानिधात्रीमालाक्षकोन्नरं ॥ तावद्वर्षसहस्राणिवैकुंठेवसतिर्भवे
त् ॥ मालायुग्मंतुयोनित्यंधात्रीतुलसिसंभवं ॥ वहतेकंठदेशेतुकल्पकोटिदिवंवसेत् ॥ तुलसीका

कृत्यर॰ षसंभूतेमालेकृष्णजनप्रिये॥ बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभं॥ एवंसंप्रार्थ्यविधिनामालां
४२ कृष्णगलेर्पितां॥ धारयेत्कार्तिकेयोवैसगच्छेद्वैष्णवंपदं॥ स्कांदे॥ धात्रीछायांतुयःकुर्यात्पिंडा
दानंमहामुने॥ मुक्तिंप्रयांतिपितरःप्रसादान्माधवस्यतु॥ धात्रीफलविलिप्तांगोधात्रीफलवि
भूषितः॥ धात्रीफलकृताहारोनरोनारायणोभवेत्॥ धात्रीछायांसमाश्रित्ययोर्चयेच्चक्रपा
णिनं॥ पुष्पेपुष्पेश्वमेधस्यफलंप्राप्नोतिमानवः॥ तथा॥ कार्तिकेवर्जयेत्तद्वत्द्विदलंबहुबी
जकं॥ माषमुद्गमसूराश्चचणकाश्चकुलत्थकाः॥ निष्पावाराजमाषाश्चआढकीद्विदलंस्मृ
तं॥ नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत्॥ नारदीये॥ कार्तिकेवर्जयेत्तैलंकार्तिकेवर्ज
येन्मधुः॥ कार्तिकेवर्जयेत्कांस्यंकार्तिकेशुक्तसंधितं॥ तथाकार्तिकेछूद्रसेवीयःप्राजापत्य शिव॰
पो परोपिवा॥ एकांतरोपवासीवात्रिरात्रोषितोपिवा॥ षड्रात्रद्वादशपक्षंवामासंवावरवर्णिनि॥ ए ४२
कभक्तेननक्तेनतथैवायाचितेनवा॥ उपवासेनभैक्षेणव्रततेपरमंपदं॥ काशीखंडे॥ ऊर्जे

यवान्नमश्नीयादेकान्नमथवापुनः॥ वृंताकंस्मरणंचैवश्लकशिंबीश्चवर्जयेत्॥ नारदीये॥ अन्नंते
नक्षयेत्कोंद्येमासंदामोदरप्रियं॥ तिर्यग्योनिमवाप्नोतिनात्रकार्याविचारणा॥ निर्णयामृते॥
पौष्करे॥ तुलायांतिलतैलेनसायंकालेसमागते॥ आकाशदीपंयोदद्यान्मासमेकंहरिंप्रति॥
महतींश्रियमाप्नोतिरूपसौभाग्यसंपदं॥ तद्विधिर्हेमाद्रौआदित्यपुराणे॥ दिवाकरेस्ताचलमौ
लिभूतेगृहाद्दूरेपुरुषप्रमाणं॥ यूपाकृतिंयज्ञियवृक्षदारुमारोप्यभूमावथतस्यमूर्ध्नि॥ कु
ताष्टतस्त्रोष्टदलाकृतिस्फपाभिर्भवेदष्टदलानुसारी॥ तत्कर्णिकायांतुमहाप्रकाशोदीपः
प्रदेयोदलगास्तथाष्टौ॥ निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथधर्मराजे॥ प्रजापतिभ्यस्तु
था पितृभ्यः॥ प्रेतेभ्यएवाथतमस्थितेभ्यइति॥ आश्विनपौर्णमास्यांकोजागरव्रतंमहा
र्णवेलैंगे॥ आश्विनेपौर्णमास्यांतुचरेज्जागरणंनिशि॥ कौमुदीसासमाख्याताकार्यालो
कैर्विभूतये॥ कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतेस्थितं॥ सुगंधिर्निशिसद्वेषअक्षैर्जागरणं

इदं कोजागरव्रतं यद्दिने पूर्णिमा प्रदोषनिशीथोभयव्यापिनी तद्दिने कार्यं॥ यदा पूर्वेद्युः नि
शीथव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तदा परेद्युः कार्या॥ पूजारूपप्रधानव्याप्तिलाभात्॥ यदुक्तं

चरेत्॥ निशीथे वरदा लक्ष्मीः कोजागर्तीति भाषिणी॥ तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति
यः॥ नारिकेलैश्चपिटकैः पितॄन्देवान्समर्चयेत्॥ बंधूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेदिति॥ इति
॥ मदनरत्ने॥ नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि॥ तस्यै वित्तं प्रयच्छामि कोजागर्ति महीत
ल इति॥ अत्रैवाश्वयुजीकर्म माहाश्वलायनः॥ आश्वयुज्यामाश्वयुजीकर्मेति॥ अत्रैव व्रीह्याग्रयप
णं॥ इदं च आपदि मले कार्यमन्यथा न कार्यमित्याद्यन्यत्र द्रष्टव्यं॥ अस्याकरणे प्रायश्चित्तं का
रिकायां॥ अकृताग्रयणोऽश्नीयान्नवान्नं यदि वै नरः॥ वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्त
थेति॥ ॥ इत्याश्विनकृत्यं॥ ॥ कार्त्तिककृष्णचतुर्थी करकाभिधा॥ सा चंद्रोदयव्यापिनी ग्राह्या
॥ दिनद्वये तथात्वे कृष्णात्वात्पूर्वा कार्त्तिककृष्णाष्टमी करकाभिधा महाराष्ट्रेष्वन्येषु च प्रसिद्धा॥ सा
पि चंद्रोदयव्यापिनी कार्या॥ दिनद्वये तथात्वे पूर्वा॥ कार्त्तिककृष्णद्वादश्यां गोवत्सद्वादशीव्रतं॥
तत्प्रदोषव्यापिन्यां कार्यं॥ नरो वाथ द्विनारी वा नक्तं संकल्प्य चेतसि। उपक्रमे माषान्तं कामतोऽश्नी

यात्रौ द्वो विगतमत्सरः इत्यंते च नक्तभोजनविधानात्॥ प्रतीक्षेतागमं भक्त्या गवां गोध्यानतत्प
र इति गोष्ठागनासु संध्यायां गोपूजाविधानाच्च॥ दिनद्वये प्रदोषे सत्वे युग्मवाक्यात्पूर्वस्य पूजा
शिवरात्रिरेताः परा निर्घ्नंति वर्षं सराष्ट्रमिति वचनेनोत्तरविद्धानिषेधाच्च पूर्वा ग्राह्या तत्र कर्त्तमुक्तं॥
भविष्योत्तरे॥ सवत्सां तुल्यवर्णां च शृगालिनीं गां पयस्विनीं॥ चंदनादिभिरालिप्य पुष्पमालाभि
रर्चयेत्॥ अर्घं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः॥ चंदनैः कुंकुमैर्गंधैः पुष्पैः कालोद्भवैस्तथा॥
पादमूले तु दद्याद्वै मंत्रेणानेन पांडव॥ मातारुद्राणामिति षमंत्रः प्रोक्तो द्विजन्मनां॥ स्त्रीशूद्राणां
महाबाहो मंत्रोऽयं परिकीर्तितः॥ क्षीरोदार्णवसंभूते सुरासुरनमस्कृते॥ सर्वदेवमये मातर्गृ
हाणार्घ्यं नमोऽस्तु ते॥ दत्वार्घं तज्जलं पुलं साक्षतं मूर्ध्नि निक्षिपेत्॥ ततो माषादिसंसिद्धान्वटकां
श्च निवेदयेत्॥ मंत्रः॥ सुरभिस्त्वं जगन्मातर्नित्यं विष्णुपदे स्थिते॥ सर्वदेवमये ग्रासं नयाश्वत्वमिमं शु
भं॥ प्रार्थनामंत्रः॥ सर्वदेवमये देवि सर्वदेवैरलंकृते॥ मातर्ममाभिलषितं सफलं कुरु नंदिनि॥

कृत्यर०
४४

ततः॥ तद्दिनेतापिकायकंस्थालीपक्वंयुधिष्ठिर॥ गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेदिति॥ हे
माद्रौआग्नेये॥ कार्त्तिकःखलुमासोवैसर्वदैवमयोमहान्॥ कृष्णपक्षेविशेषेणतत्रपंचदिनानि
तु॥ पुण्यानितेषुयद्दत्तमक्षयंसार्वकामिकं॥ नारदः॥ आश्विनेकृष्णपक्षेतुद्वादश्यादिषुपंचसु॥
तिथिषूक्तःपूर्वरात्रेतुनीराजनाविधिः॥ नीराजयेयुर्देवांश्चविप्रान्गाश्चतुरंगमान्॥ ज्येष्ठान्ज्ये
ष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितइति॥ आश्विनग्रहणंमुख्यचांद्राभिप्रायेण॥ अमावास्यां
तमासपक्षेणआश्विनकृष्णत्रयोदश्यांयमोद्देशेनसंध्याकालेबहिर्दीपदानंकार्यं॥ तदुक्तंस्कां
दे॥ अश्वयुक्कृष्णपक्षेतुत्रयोदश्यांनिशामुखे॥ यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति॥ तत्रमंत्रः
॥ मृत्युनापाशदंडाभ्यांकालेनश्यामलयासह॥ त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतांममइति॥ का
र्त्तिककृष्णचतुर्दश्यांप्रातरभ्यंगस्नानंकर्त्तव्यं॥ तदुक्तंभविष्योत्तरे॥ कार्त्तिकेकृष्णपक्षेतुचतु
र्दश्यां[illegible]रभ्यंगस्नानंक[illegible]दिनोदये॥ अवश्यमेवकर्त्तव्यंस्नानंनरकभीरुभिः॥ अपामार्ग

शिव०
४४

स्यपत्राणिभ्रामयेच्छिरसोपरि॥ अमावास्यांतमासपक्षेणनारदसंहितायामपि॥ इषासितचतु
र्दश्यामिंदुक्षयतिथावपि॥ ऊर्जादौस्वातिसंयुक्तेतदादीपावलीभवेत्॥ तैलेलक्ष्मीर्जलेगंगा
दीपावलितिथौवसेत्॥ अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत्॥ इंदुक्षयेपिसंक्रांतौवारे
यातेदिनक्षये॥ तत्राभ्यंगमदोषायप्रातःपापापनुत्तयइति॥ तत्रचतुर्दशीतावदभ्यंगेदिनोद
यप्रातःशब्दयोःसमानार्थत्वात्प्रातःकालव्यापिनीग्राह्या॥ क्वचिद्दिनोदयइतिपठितं॥ तत्सर्व
संवादिवाक्यचित्स्यायोदाक्षिणात्याचारसंवादीविधूदयइतिपाठः॥ तदाचंद्रोदयाकालिकास्ना
नेग्राह्या॥ तत्रयदापूर्वेद्युरेवतस्यांचंद्रोदयेवावर्त्ततेसाऽखंडासर्वकल्पेषुदीपदानांतेषुसमीचीनैव॥
यावत्तत्रैवप्रातश्चंद्रोदयेवावर्त्ततेतावत्येवसमाप्तास्तस्यांस्नानंयमतर्पणंचकार्यं॥ ततश्चतर्प
णंकार्यंधर्मराजस्यनामभिः॥ यमायधर्मराजायमृत्यवेचांतकायच॥ वैवस्वतायकालायस
र्वभूतक्षयायच॥ औदुंबरायदध्नायनीलायपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायतेनम

कृत्यर० इति भविष्योत्तरे॥ अभ्यंगस्नानानंतरं तर्पणविविधानात्॥ तस्य कालविशेषानुक्तेश्च॥ यात्तु
४५ दिनद्वयेपि कालव्यापिनीः तस्यां पूर्वस्यामेव स्नानादिकार्यं॥ संपूर्णत्वात्॥ अपः कृत्स्नक्रमानु
रोधाच्च॥ यादिनद्वयेपि कालास्पर्शिनी सापि पूर्वैव॥ स्वकालादुत्तरः कालो गौणः पूर्वस्य कर्मण
इत्युक्त गौणकालव्यापित्वात्॥ एवं विद्धचतुर्दश्यां कार्त्तिकस्य सितेतरे॥ प्रत्युषसमये स्नानं कु
र्यात्तत्र प्रयत्नत इति चंद्रोदयधृतवचनाच्च॥ स्नानं तु तत्कालेऽसत्यामपि चतुर्दश्यां चंद्रोदयए
व भवति॥ तिथ्यादौ च भवेद्यावान्नित्युत्तरतिथिक्षयप्रक्षेपेण शास्त्रतस्तत्र तिथेः सत्वात्॥ अ
त्र स्नाने विशेषो ब्रह्मपुराणे॥ अपामार्गमथो तुंबी प्रपुन्नाटमथापरं॥ भ्रामयेत्स्नानमध्ये तु
नरकस्य क्षयाय वै॥ तत्र मंत्र॥ सीतालोष्टसमायुक्त सकंटकदलान्वित॥ हर पापमपामा
र्ग भ्राम्यमाणः पुनः पुनरिति॥ मंत्रलिंगात्सीतालोष्टस्यापि भ्रामणे पूर्वैः साहित्यं॥ यमतर्प शिव०
णं चोपवीतिना प्राचीनावीतिना वा कार्यं॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा॥ देवत्वं ४५

च पितृत्वं च यमस्यास्ति द्विरूपतेति वचनात्॥ इदं च केवलाबुद्धकृत्स्नतिथिसकृत्स्यत्रिरात्रत्वादि
रूपदैवपित्र्यधर्मविकल्पो द्रष्टव्यः॥ हेमाद्रौ भविष्योत्तरे॥ इति स्नात्वा प्रदातव्या दीपाः संपूज्य
देवताः॥ क्वचिदिति स्नात्वेत्यस्य स्थाने नरकाय प्रदातव्या इति पठितं॥ नरकाय नरकासुरोद्देशे
नेति बहवः॥ क्वचिन्मन्त्राकार्थो धर्म इतिवत् निवर्त्तप्रयोजनत्वेन व्याख्यातं॥ तत्रैव॥ ततः प्रदो
षसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति यदा पूर्वदिने प्र
दोषे चतुर्दशी स्नानयोग्या चोत्तरदिने तदा पूर्वदिने प्रदोषे दीपदानादि कृत्वा परेद्युः॥ स्नानं कार्यं
क्रमानुरोधेन कालबाधस्यान्याय्यत्वात्॥ ज्योतिर्ग्रंथे॥ तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः
॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनं॥ तत्रोल्काग्रहणे मंत्रः॥ शस्त्राशस्त्रहतानां च
भूतानां भूतदर्शयोः॥ उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निनेति॥ तद्दाने॥ अग्निदग्धाश्च ये
जीवा येप्यदग्धाः कुले मम॥ उज्ज्वलज्योतिषा दग्धास्ते यांतु परमां गतिमिति॥ तद्विसर्जने॥ य

कृत्यर० मलोकंपरित्यज्यआगतायेमहालये॥ उज्वलज्योतिषावर्त्मप्रपश्यंतोव्रजंतुतइति॥ अन्यदपिलिं
४६ त्वलैंगेततः॥ प्रेतचतुर्दश्यांभोजयित्वातपोधनात्॥ शैवान्विप्रान्धर्मपरान्शिवलोकेम
हीयते॥ माषपत्रशाकेनभुक्त्वातत्रदिनेनरः॥ प्रेतचतुर्दशीकालेसर्वपापैःप्रमुच्यते॥ नक्तं
प्रेतचतुर्दश्यांयःकुर्याच्छिवतुष्टये॥ नतत्क्रतुशतेनापिप्राप्यतेपुण्यमीदृशमिति॥ अमायामा
पिप्रातरभ्यंगस्नानंकार्यं॥ एवंप्रभातसमयेत्वमावास्यांनराधिप॥ स्नात्वादेवान्पितॄन्भक्त्या
संपूज्याथप्रणम्यचेतिभविष्योत्तरात्॥ नारदेनापितिथित्रयंदीपावलीत्वेनाभिधायतत्रतैले
लक्ष्मीरित्यादिनाभ्यंगस्नानंविहितंपौष्करेस्वातिस्थितेरवाविंदुर्यदिस्वातियुतोभवेत्॥ पंच
त्वगुदकस्नायीकृताभ्यंगविधिर्नरः॥ नीराजितोमहालक्ष्मीमर्चयन्श्रियमश्नुतइति॥ अमा शिव०
वास्यांकर्त्तव्यदीपदानंतुकृत्वातुपार्वणश्राद्धमित्यभिधायततोपराह्णसमयइतिराजकृ ४६
त्यमध्येदीपमालाकुलेरम्येविधस्तध्वांतसंचये॥ प्रदोषेदोषरहितेशस्तेदोषामेगेश्वभद्रत्य

भिधानाच्छ्राद्धानंतरंकर्त्तव्यमिति॥ यद्यपिप्रतीयतेश्राद्धदिनेप्रदोषव्यापिन्यांतस्यांतत्त्वंभव
त्येवतथापियदापूर्वद्युरेवप्रदोषेलक्ष्मींसंपूज्यदीपदानंकार्यं॥ दिवातत्रभोक्तव्यमृतेबाला
तुराज्जनात्॥ प्रदोषसमयेलक्ष्मींपूजयित्वाततःक्रमात्॥ दीपवृक्षास्तथाकार्याःशक्त्यादेव
गृहेषुचेत्यादित्यपुराणेतस्यप्रदोषकालत्वाभिधानात्॥ कालविरोधेचक्रमस्यानादरणीय
त्वात्॥ परमार्थतस्तुस्वकालप्राप्तश्राद्धानुवादत्वात्क्रमस्याविधानमेव॥ औत्सर्गिकांखंड
तिथेरेवप्राप्तोयोव्यवहारविषयत्वेनतस्यप्राप्तत्वात्॥ यदातुदिनद्वयेप्रदोषव्यापिन्यमावा
स्यातदोत्तरा॥ युग्मवाक्यात्॥ दंडकेरजनीयोगोदर्शस्यस्यात्कदाचन॥ तदाविहायपूर्वेद्युःपरे
ह्निसुखरात्रिकेतितिथितत्त्वोदाहृतवचनात्॥ लक्ष्मीपूजनंतु॥ ॐलक्ष्म्यैनमइतिनाममंत्रेण
कार्यंपूजानंतरंप्रार्थना॥ नमस्तेसर्वदेवानांवरदासिहरिप्रिया॥ यागतिस्त्वत्प्रपन्नानांसामे
भूयात्त्वदर्चनादिति॥ तथा॥ सुखरात्र्यांप्रदोषेतुकुबेरंपूजयंतिवै॥ तत्रमंत्रः॥ धनदायनम

कृत्यर०
४७

स्तुभ्यं निधिपद्माधिपाय च ॥ भवंतु त्वत्प्रसादान्मे धनधान्यादिसंपदः इति ॥ दीपदाने मंत्रः ॥ अग्नि
ज्योतिरविज्योतिश्चंद्रोज्योतिस्तथैव च ॥ उत्तमः सर्वज्योतीनां दीपोयं प्रतिगृह्यतामिति ॥ एवं दी
पान्दत्वा दीपवृक्षांश्च कृत्वा ब्राह्मणानन्यांश्च बुभुक्षितान्भोजयित्वा स्वयमलंकृतो बंधुभिः
सह भुंजीत ॥ ब्राह्मणान्भोजयित्वादौ संभोज्य च बुभुक्षितान् ॥ अलंकृतेन भोक्तव्यं नववस्त्रो
पशोभिना ॥ स्निग्धैर्मुग्धैर्विदग्धैश्च निर्वृतैर्बांधवैः सहेत्यादित्यपुराणात् ॥ मदनरत्ने भविष्ये ॥ ए
वं गते निशीथे तु जने निद्रार्धलोचने तावन्नगरनारीभिर्पडिंडिमवादनैः ॥ सूर्पडिंडिमवादनै
रिति क्विलासः ॥ निःकाश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणादिति ॥ अन्यदपि कृत्यं भविष्योत्त
सुखरात्रेरुषःकाले प्रदीपोज्वलितालये ॥ सर्वान्विधून्वंधूंश्च वाचाकुशलपावयेत् ॥ प्रदीपवंद
नं कार्यं लक्ष्मीमंगलहेतवे ॥ गोरोचनाक्षतं चैव दद्याद्दंगेषु सर्वतः ॥ विश्वरूपस्य भार्यासि पद्मे
पद्मालये शुभे ॥ महालक्ष्मी नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥ वर्षाकाले महाघोरे यन्मया दुष्कृ

शिव०
४७

तं कृतं ॥ सुखरात्रिप्रभातेद्य तन्मे लक्ष्मीर्व्यपोहतु ॥ या रात्रिः सर्वभूतानां याच देवेष्ववस्थिता
संवत्सरप्रिया या च सा ममास्तु सुमंगला ॥ माता त्वं सर्वभूतानां देवानां सृष्टिसंभवा ॥ आख्या
ता भूतले देवि सुखरात्रिर्नमोस्तु ते इति ॥ एतदुत्तरप्रतिपद्यपि दीपावलीत्वात्प्रातरभ्यंगस्नानं
कृत्वा द्यूतादि कर्त्तव्यं ॥ तथा चादित्यपुराणे ॥ शंकरश्च पुरा द्यूतं ससर्ज सुमनोहरं ॥ कार्त्तिके
शुक्लपक्षे तु प्रथमेहनि सत्यवान् ॥ जितश्च शंकरस्तत्र जयं लाभे च पार्वती ॥ अतोर्थे शंकरो
दुःखी गौरी नित्यं सुखोचिता ॥ तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ॥ तस्मिन्द्यूते जयो यस्य त
स्य संवत्सरं जयः ॥ पराजये विरुद्धं तु लब्धनाशकृतो भवेत् ॥ श्रोतव्यं गीतवाद्यादि स्वनुलिप्तै
ःस्वलंकृतैः ॥ विशेषवस्त्रभोक्तव्यं प्रशस्तैर्बांधवैः सह ॥ तस्यां निशायां कर्त्तव्यं शय्यास्थानं सु
शोभनं ॥ गंधैर्वस्त्रैस्तथा पुष्पैरत्नैर्माल्यैरलंकृतं ॥ दीपमालापरिक्षिप्तं तथा धूपेन धूपितं ॥ द
पिताभिश्च सहितैर्नेया सा च भवेन्निशा ॥ नवैर्वस्त्रैश्च संपूज्या द्विजसंबंधिबांधवा इति ॥ भविष्ये

कृत्यर० ४८ त्सरे॥ योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिरः॥ हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि॥ रुदितोरो
दितेवर्षंहृष्टोवर्षंप्रहृष्यति॥ भुक्तोभोक्ताभवेद्वर्षंप्रयातिस्वस्थःस्वस्थोभविष्यति॥ तस्मात्प्रहृ
ष्टैस्तुकर्त्तव्याकौमुदीनरैः॥ वैष्णवीदानवीयेयंतिथिःप्रोक्तायुधिष्ठिर॥ तत्रैव॥ लोकश्चापिगृह
स्यांतःशय्यायांशुक्लतंडुलैः॥ संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत्॥ बलिमुद्दिश्यदी
यंतेदानानिकुरुनंदन॥ यानितान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितमिति॥ अत्रयद्यपिबलिपू मि
जायांकालविशेषानोक्तस्तथापिराजकर्त्तव्यतत्पूजायांकृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः॥
पूजांकुर्यान्नृपःसाक्षाद्भूमौमंडलकेकृते॥ बलिमालिख्यदैत्येंद्रंवर्णकैःपंचरंगकैः॥ सर्वाभरण
संपूर्णंविंध्यावल्यासमन्वितं॥ कूष्मांडबाणजंभोरुमुरुदानवसंवृतं॥ संपूर्णहृष्टवदनंकिरी त्रिव०
टोत्कटकुंडलं॥ द्विभुजंदैत्यराजानंकारयित्वानृपःस्वयं॥ गृहस्यमध्येशालायांविशालायांत ४८
तोर्चयेदितिरात्रेःकालत्वाभिधानात्सर्वेषामपिसएवकालः॥ शुक्लतंडुलनिर्मेयाप्रतिमापि

तादृश्येव॥ बलिपूजायांमंत्रोवामनपुराणे॥ बलिराजनमस्तुभ्यंविरोचनसुतप्रभो॥ भविष्येंद्र
सुराराते पूजेयंप्रतिगृह्यतामिति॥ वस्तुदेशेनदीपदानमुक्तंतत्रैववामनकर्तृकबलिवरदान
व्याजेन॥ वीरप्रतिपदंप्राप्यतवभावीमहोत्सवः॥ तत्रत्वांनरशार्दूलहृष्टाःपुष्टाःस्वलंकृताः॥ ह
अर्घ्यदीपप्रदानेनअर्चयिष्यंतिमानवाइति॥ इयंचप्रतिपद्बलिपूजनेपूर्वविद्धाग्राह्या॥ कालव्या
पित्वाभावात्॥ श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी॥ पूर्वविद्धाचकर्त्तव्याशिवरात्रिर्बलेर्दिन
मितिवचनाच्च॥ गोपूजनादावपिपूर्वविद्धैवप्रतिपद्दर्शसंयोगेक्रीडनंतुगवांमतं॥ परविद्धेषुय
ःकुर्यात्त्रीणिवर्द्धंतेप्रजागावोमहीपतिःसुतदारधनक्षयः॥ याकुहूःप्रतिपन्मिश्रातत्रगाःपूजये
न्नृपः॥ पूजनेत्रीणिवर्द्धंतेप्रजागावोमहीपतिरितिदेवलवचनात्॥ यद्यपिपूर्वाह्णेक्रीडनंगवामि
तिवचनात्स्यात्ःकालव्यापित्वंतत्रैवगोक्रीडनादेःप्रतिभातितथापिगवांक्रीडादिनेयत्ररात्रौ
दृश्यतेचंद्रमाः॥ सोमोराजापशून्हंतिसुरभीपूजकंतथेतिदेवलेनप्रतिषिद्धत्वात्सातत्रनग्राह्या॥

॥चंद्रदर्शनाभावेकश्चिदुत्तरापिग्राह्यत्वेनोक्तात्रियामगादर्शतिथिर्भवेच्चेत्साऽर्द्धत्रियामाप्रतिपद्
दृष्टौ॥दीपोत्सवेतेमुनिभिःप्रदिष्टेअतोन्यथादर्शयुतेविधेयेइति॥कार्त्तिकेशुक्लपक्षेतुविधा
नद्वितयंभवेत्॥नारीनीराजनंप्रातःसायंमंगलमालिकेतिब्रह्मपुराणोक्तंतुकर्मद्वयंस्वव्या
पिद्वितीयाविद्धायामेवप्रतिपदिकर्त्तव्यं॥लभ्येतपदिवाप्रातःप्रतिपद्घटिकाद्वयं॥तस्यांनी
राजनंकार्यंसायंमंगलमालिकेति॥भविष्यत्पुराणात्॥कार्त्तिकेशुक्लपक्षादावमावास्याघ
टीद्वयं॥देशभंगभयान्नैवकुर्यान्मंगलमालिकामितिदेवीपुराणे॥अमायुक्तायानिषेधाच्च॥
कार्त्तिकशुक्लद्वितीयायमद्वितीयाख्यांशुक्लायांभ्रा०॥तस्यांभ्रातृपूजनंकार्यं॥तथाचलिंगपु
राणे॥कार्त्तिकेतुद्वितीयायांशुक्लायांभ्रातृपूजनं॥यानकुर्याद्विनश्यंतिभ्रातरःसप्तजन्म
सु॥तस्याइतिशेषः॥भविष्योत्तरेपि॥कार्त्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर॥यमोय
मुनयापूर्वंभोजितःस्वगृहेस्वयं॥अतोयमद्वितीयासौप्रोक्तालोकेयुधिष्ठिर॥अस्यांनिजगृहेया

र्थनभोक्तव्यमतोबुधैः॥यत्नेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं॥दानानिचप्रदेयानिभगिनीभ्यो
विशेषतः॥स्वर्णालंकारवस्त्राणिपूजासत्कारभोजनैः॥सर्वाभगिन्यःसंपूज्याअभावेप्रति
पन्नकाः॥प्रतिपन्नकाःप्रतिपन्नाभगिनीत्वेनव्यवहृताइत्यर्थः॥मित्रभगिन्यइतिहेमाद्रिः॥
तथायमंचचित्रगुप्तंचयमदूतांश्चपूजयेत्॥अर्घश्चात्रप्रदातव्योयमायसहजद्वयैः॥भ्रातृ
भगिनीभिरित्यर्थः॥अर्घ्यमंत्रः॥एह्येहिमार्त्तंडजपाशहस्तयमांतकालोकधरामरेश॥भ्रा
तृद्वितीयाकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्ते॥पूजानंतरंप्रणाममंत्रः॥धर्मराजन
मस्तुभ्यंनमस्तेयमुनाग्रज॥पाहिमांकिंकरैःसार्द्धंसूर्यपुत्रनमोस्तुते॥यमस्वसर्नमस्तेस्तु
यमुनेलोकपूजिते॥वरदाभवमेनित्यंसूर्यपुत्रिनमोस्तुतेइतिकश्चिद्भ्रातुर्भोजनदानेमंत्रः
॥भ्रातस्तवानुजाताहंभुंक्ष्वभक्तमिमंशुभं॥प्रीतयेयमराजस्ययमुनायाविशेषतइति॥ज्येष्ठा
तुभ्रातस्तवाग्रजाताहमितिपठेत्॥ ॥कार्त्तिकशुक्लचतुर्थ्यांनागव्रतं॥तथाचकार्त्तिकशु

कृत्यर० क्लपक्षमुपक्रम्यकौर्मे॥तिथौयुगाद्यायांतुसमुपोष्ययथाविधि॥शंखपालादिनागानांशेष
५० स्यचमहात्मनः॥पूजाकार्यापुष्पगंधक्षीराप्यायनपूर्वकमिति॥एतच्चमध्याह्नव्यापिन्यांकार्यं
॥युगंमध्यंदिनेयत्रतत्रोपोष्यफणीश्वरान्॥क्षीरेणाप्याप्यपंचम्यांपारयेत्प्रयतोनरः॥वि
षाणितस्यनश्यंतिनतंहिंसंतिपन्नगाइतिस्कंदपुराणात्॥कार्तिकशुक्लषष्ठ्यांकृत्यविशेषो
भविष्योत्तरे॥षष्ठ्यांफलाशनोराजन्विशेषात्कार्तिकेनृप॥राज्यच्युतोविशेषेणस्वराज्यंल
भतेचिरात्॥दत्वार्घ्यंकार्तिकेयायस्थित्वावैदक्षिणामुखः॥दध्नाघृतोदकैःपुष्पैर्मंत्रेणाने
नसुव्रत॥सप्तर्षिदारजस्कंदसेनाधिपमहाबल॥रुद्रोमाग्निजषड्वक्त्रगंगागर्भनमोस्तुते॥
प्रीयतांदेवसेनानीःसंपादयतुहृद्गतं॥दत्वाविप्रायचामात्रंयच्चान्यदपिवर्त्तते॥पश्चाद्भुं शिव०
क्तेलसोरात्र्यांभूमिंकृत्वातुभाजनमिति॥कार्तिकशुक्लनवमीयुगादि॥निर्णयःपूर्व ५०
युक्तः॥अस्यामेवविष्णुत्रिरात्रारंभः॥हेमाद्रौपद्मपुराणे॥कार्तिकेशुक्लनवमीमवाप्य॥

विजितेंद्रियः॥हरिंविधायसौवर्णंतुलस्यासहितंविभुः॥पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयं
॥एवंयथोक्तविधिनाकुर्याद्वैवाहिकंविधिमिति॥॥कार्तिकशुक्लैकादशीकृत्यंनारदीये॥कार्त्ति
केशुक्लपक्षस्यकृत्वाह्येकादशींनरः॥प्रातर्दत्वाशुभान्कुंभान्प्रयातिहरिमंदिरं॥मदरैत्लेवारा
हेशुक्लपक्षंप्रक्रम्यएकादशीसोमायुक्ताकार्तिकेमासिभामिनि॥उत्तराभाद्रसंयोगेअनंतासा
प्रकीर्त्तिता॥तस्यांयत्क्रियतेभद्रेसर्वमानंत्यमश्नुते॥अनंतपुण्यफलदातेनानंतास्मृताप्रिये
इति॥अस्यामिप्रबोधोत्सवउक्तोब्राह्मेएकादश्यांचशुक्लयांकार्त्तिकेमासिकेशवं॥प्रसुप्तंबोध
येद्रात्रौश्रद्धाभक्तिसमन्वितः॥नृत्यैर्गीतैस्तथावाद्यैर्ऋग्यजुःसाममंगलैः॥वीणापणववाद्यै
श्चपुराणश्रवणेनच॥वासुदेवकथाभिश्चस्तोत्रैरन्यैश्चवैष्णवैरिति॥भविष्योत्तरेपि॥कार्त्तिके
शुक्लपक्षस्यएकादश्यांसमाहितः॥मंत्रेणानेनराजेंद्रदेवमुत्थापयेद्द्विजः॥वराहपुराणे
तुद्वादश्यांप्रबोधोत्सवउक्तः॥रामार्चनचंद्रिकायामपि॥पारणाहेपूर्वरात्रेद्यंनादिन्वादशन्मु

कृत्यर° ५१

दुरितिप्रबोधमंत्रवाराहे॥ ॐ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीया॥ बुध्यस्वदे
वेशजगन्निवासमंत्रप्रभावेनसुखेनदेव॥ इयंतुद्वादशीदेवप्रबोधार्थंतुनिर्मिता॥ त्वयैनसर्व
लोकानांहितार्थंशेषशायिना॥ त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं॥ उत्थितेचेष्टतेसर्वमुत्ति
ष्ठोत्तिष्ठमाधव॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते॥ त्वयिसुप्तेजगत्सुप्तमुत्थितेचोत्थितं
जगदिति॥ एवंप्रबोध्यपुष्पांजलिंदद्यात्॥ तत्रमंत्रः॥ गतामेघावियच्चैवनिर्मलंनिर्मलादिशः
॥ शारदानिचपुष्पाणिगृहाणममकेशवेति॥ अस्यामेवचातुर्मास्यव्रतसमाप्तिरुक्तंवाराहे
॥ चतुर्थापिहितच्चीर्णचातुर्मास्यव्रतंनरः॥ कार्त्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेदितिवत्
र्षएकादशीपूर्णिमाकर्कसंक्रांतिधारधामित्यर्थः॥ भविष्योत्तरे॥ चातुर्मास्येतुयत्त्यक्तंभक्ष्य
भोज्यादिकंचयत्॥ चतुरोवार्षिकान्मासान्नियमोयस्ययत्कृतः॥ कथयित्वाद्विजेभ्यस्तंद ॥ त्रिव° ५१
द्याद्ब्राह्मणासदक्षिणं॥ दत्वाविसर्जयेद्विप्रंततोभुंजीतचस्वयमिति॥ व्रतसमापनेमंत्रः॥ सन

कुमारेणोक्ताः॥ इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो॥ न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दनेति अ
स्यांरेवतीनक्षत्रांत्यपादयोगेपारणंनकार्यं॥ सुप्तिप्रबोधपरिवर्त्तनमेववर्ज्यमितिप्राग्लिखितव
चनात्॥ इदंचशुक्लास्नादावपिकार्यंनियतकालत्वात्॥ इयंचमन्वादिः॥ कुतपपूर्वविद्धव्यापिनीग्रा
ह्या॥ कार्त्तिकशुक्लचतुर्दश्यांपूर्वदिनेकृतोपवासःअरुणोदयेमणिकर्ण्यांस्नात्वाविश्वेश्वरंपूज
येत्॥ तस्याविश्वेश्वरप्रतिष्ठादिनत्वात्॥ तथाचसनत्कुमारसंहितायां॥ नंदिकेश्वरउवाच॥ वर्षे
वह्निमलवार्ख्येमासेश्रीमतिकार्त्तिके॥ शुक्लपक्षेचतुर्दश्यांमरुणाभ्युदयंप्रति॥ महादेवतिथौ
ब्राह्मेमुहूर्तेमणिकर्णिके॥ स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयत्॥ संक्षेपंज्योतिषस्तस्यप्र
तिष्ठाख्यंतदाकरोत्॥ ततःप्रभातेविमलेकृत्वापूजांमहाद्भुतां॥ दंडपाणेर्महाधाम्निवनेस्मिन्कृत
सण इति॥ अत्रअन्योप्येवंकुर्यादितिपरकृतिरूपेणार्थवादेनविधिः॥ कल्प्यते॥ काशीखंडे
॥ कार्त्तिकस्यचतुर्दश्यांविश्वेशं योविलोकयेत्॥ स्नात्वाचोत्तरवाहिन्यांनतस्यपुनरागतिः॥ इ

कृत्यर० ५२ यमेववैकुंठसंज्ञा॥ अस्यांरात्रौसोपवासेनहरिपूजनकार्यं॥ तदुक्तंहेमाद्रौभविष्ये॥ कार्त्तिकस्य
सितपक्षेचतुर्दश्यांनराधिप॥ सोपवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियइति॥ अत्रकर्मकालव्या
पिताद्रात्रिव्यापिनीग्राह्या॥ अत्रैवकार्त्तिकव्रतोद्यापनमुक्तंपाद्मीयकार्त्तिकमाहात्म्ये॥ अथो
र्जव्रतिनःसम्यगुद्यापनविधिंकृष्ण॥ ऊर्जशुक्लचतुर्दश्यांकुर्यादुद्यापनंव्रती॥ व्रतसंपूर्णतार्थं
यविष्णुप्रीत्यर्थमेवच॥ तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां॥ द्वारेषुद्वारपालांश्चपूजये
न्मृन्मयान्पृथक्॥ पुण्यशीलंसुशीलंचजयंविजयमेवच॥ तुलसीमूलदेशेतुसर्वतोभद्रमेव
च॥ तस्योपरिष्टात्कलशंपंचरत्नसमन्वितं॥ पूजयेत्तत्रदेवेशंशंखचक्रगदाधरं॥ पीतकौशे
यवसनंयुक्तंजलधिकन्यया॥ इंद्रादिलोकपालांश्चमंडलेपूजयेद्व्रती॥ तस्यामुपवसेत्स्नात्वा शिव० ५२
दांतःप्रयतमानसः॥ पूजयेद्देवदेवेशंसौवर्णंगुर्वनुज्ञया॥ रात्रौजागरणंकुर्याद्गीतवाद्या
दिमंगलैः॥ ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान्॥ त्रिंशन्मितानथैकंवास्वशक्त्यावानि

मंत्रयेत्॥ आतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसं॥ ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरुं॥ सपत्नी धि
कांस्तमभ्यर्च्यनत्वाविप्रान्क्षमापयेत्॥ युष्मत्प्रसादाद्देवेशाःप्रसन्नोममसर्वदा॥ व्रतादस्माच्चय
त्पापंसप्तजन्मकृतंमया॥ तत्सर्वंनाशमायातुस्थिरामेचास्तुसंततिः॥ इतिक्षमाप्यतान्सर्वान्प्रसाद्य
चविसर्जयेत्॥ तामर्चांगुरवेदद्याज्जलयुक्तांतदाव्रती॥ ततःसुहृद्गुरुयुतःस्वयंचनत्वाभुंजीतभक्ति
मानिति॥ कार्त्तिकीपौर्णमासीसामान्यनिर्णयात्परा॥ इयंचमन्वादिः॥ अत्रविशेषोहेमाद्रौब्रा
ह्मे॥ पुण्यामहाकार्त्तिकीस्याज्जीवेंद्वोःकृत्तिकास्थयोःकृत्तिकासुचचंद्रमाः॥ संयोगःपद्मकोनामपुष्करे
हेमाद्रौब्राह्मे॥ पाद्मे॥ विशाखासुयदाभानुःकृत्तिकास्वतिदुर्लभः॥ पद्मकंपुष्करेप्राप्यकपिलांयः
प्रयच्छति॥ सहित्वासर्वपापानिवैष्णवंलभतेपदं॥ यमः॥ कार्त्तिक्यांपुष्करेस्नातःसर्वपापैःप्रमुच्य
ते॥ अन्यत्रापि॥ आग्नेयंतुयदाऋक्षंकार्त्तिक्यांभवतिक्वचित्॥ महतीसातिथिर्ज्ञेयास्नानदानेषुचो
त्तमा॥ यदातुयाम्यंभवतिऋक्षंतस्यांतिथौक्वचित्॥ तिथिःसापिमहापुण्यामुनिभिःपरिकीर्त्ति

कृत्यर० ५३

ता॥ प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप॥ सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभेति॥ अस्या
मेव संध्याकाले त्रिपुरदाहोत्सवो भार्गवार्चनदीपिकायां॥ पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रैपुरोत्स
वः॥ दद्यादनेन [illegible] त्रेण प्रदीपांश्च सुरालये॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरं
ति जीवाः॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि विप्राः इति॥ अस्यामेव मत्स्यावतार
उक्तः॥ पाद्मे कार्त्तिकमाहात्म्ये॥ वेदाल्लातुं गतो विष्णुर्मत्स्यरूप्यभवत्ततः॥ तस्यां दत्तं हुतं जप्तं तद
क्षयफलं स्मृतमिति॥ अस्यां वृषोत्सर्गं कृत्वा नक्तं कार्यं॥ उक्तं मात्स्ये॥ कार्त्तिक्यां यो वृषोत्सर्गं कृ
त्वा नक्तं समाचरेत्॥ शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति॥ ॥ पूर्णिमांतमार्गशीर्षकृष्णा
ष्टम्यामपराह्णे भैरवोत्पत्तिः॥ यत्तु दर्शनित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवाविति शिवरह शिव०
स्यं तन्मध्ये बहुकृत्याभिधानादविनाद्विरुद्धं॥ कार्त्तिकीखंडे॥ मार्गशीर्षसिताष्टम्यां कालभै ५३
रवसन्निधौ॥ उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते॥ त्रिस्थलीसेतौ॥ कृत्वा च विविधां पूजां महासं

भारविस्तरैः॥ नरो मार्गसिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत्॥ अत्र उपवासोऽर्घदानं जागरणं रात्रौ या
मचतुष्टये पूजेत्यादि शिवरहस्ये उक्तं॥ इयं च पूर्वविद्धा ग्राह्या॥ कृष्णपक्षगतत्वात् दिवाव्रतं चेत्तत्काल
व्याप्तिलाभाच्च॥ मार्गशुक्लपंचम्यां नागपूजोक्ता स्कांदे॥ शुक्ला मार्गशिरे पुण्या श्रावणे या च पंच
मी॥ स्नानदानैर्बहुफला नागलोकप्रदायिनीति॥ इयं चोत्तरविद्धा कार्या॥ पंचमी नागपूजायां का
र्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति वचनात्॥ मार्गशुक्लषष्ठ्यां मल्ला
रिपूजा॥ सा चोत्तरविद्धायां कार्या षण्मुन्योरिति युग्मवाक्यात्॥ इयमेव योगविशेषे चंपाभिधा॥ त शे
दुक्तं मल्लारिमाहात्म्ये॥ मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता॥ रविवारेण संयुक्ता सा चंपेती
हकीर्त्तितेति॥ इयं योगवशेन पूर्वापरा वा ग्राह्या॥ इयमेव स्कंदषष्ठी॥ सा च पूर्वा॥ कृष्णाष्टमी स्कं
दषष्ठी शिवरात्रिचतुर्दशी॥ एताः पूर्वयुताः कार्या इति वचनात्॥ मार्गशुक्लचतुर्दश्यां काश्यां
पिशाचमोचनयात्रा॥ मार्गपौर्णमास्यां दत्तात्रेयोत्पत्तिः॥ तदुक्तं स्कांदे सह्याद्रिखंडे॥ मार्गशीर्षेत

स्प२

कृत्यर० पामासिदत्तामेक्रिसुनिर्मले॥ मृगशीर्षयुतेपौर्णमास्यां[illegible]मार्गशीर्षमास्यांदत्ता
५४ त्रेयो[illegible]बवासरे॥ जनयामासदेदीप्यमानंपुत्रंसतीशुभं॥ तंविष्णुमागतंज्ञात्वाअत्रिर्नामा
करोत्स्वयं॥ दत्तवान्स्वस्यपुत्रत्वंदत्तात्रेयमितीश्वरमित्यादि॥ दत्तमिमासीत्यन्वयतश्चयंपूर्ववि
द्धाग्राह्या॥ वृद्धसमाचारात्॥ अमांतमासपक्षेणमार्गकृष्णाष्टमीअष्टका॥ हेमंतशिशिरयो॥
श्चतुर्णामपरपक्षाणामष्टम्योष्टकाइत्याश्वलायनवचनात्॥ तत्पूर्वदिनेपूर्वेद्युःश्राद्धं॥ उत्तरदिने
चअन्वष्टक्यं॥ पूर्वेद्युःपितृभ्योदद्यात्॥ अपरेद्युरन्वष्टक्यमित्याश्वलायनसूत्रात्॥ अत्राष्टमी
अपराह्णव्यापिनीग्राह्या॥ पूर्वेद्युरन्वष्टक्ययोस्तुसप्तम्यनुरोधेननिर्णयः॥ अत्रश्राद्धाशक्तावाश्वला
यनः॥ अप्यनडुहोयवसमाहरेद्दहेदग्निनवाकक्षमुपोषेदेषामष्टकेतिनत्वेवानष्टकःस्यादि
ति॥ श्राद्धाकरणेप्रायश्चित्तमुक्तंमृग्विधाने॥ एभिर्द्युभिर्जयेन्मंत्रंशतवारंतुतद्दिने॥ अन्व शिव०
ष्टक्यदानात्पुण्यंसंपूर्णंयातिसर्वथेति॥ मार्गादिषुमलमासपातेतत्राष्टकानकार्या॥ चतुर्णा ५४

मिष्णुकृत्वादिष्णुक्तंनारायणवृत्तौ॥ महालयाष्टकाश्राद्धेपाकगृह्याच्च॥ मार्गकृत्यं॥ ॥पौषशुक्ला
ष्टम्यांविशेषःकृत्यकल्पतरौभविष्ये॥ पौषेमासियदादेविशुक्लाष्टम्यांबुधोभवेत्॥ तस्यास्नानंज
पोहोमस्तर्पणंविप्रभोजनं॥ मत्प्रीतयेकृतंदेविशतसाहस्रिकंभवेत्॥ अत्ररोहिण्यार्द्रायोगेपुण्यतम
त्वं॥ पौषेशुक्लैकादशीमन्वादिः॥ अस्यामेवमाघस्नानारंभउक्तोब्राह्मे॥ एकादश्यांशुक्लपक्षेपौष
मासेसमारभेत्॥ अत्ररोहिण्यांद्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमापयेदिति॥ माघइतिशेषः॥
पक्षांतरमाहविष्णुः॥ दर्शेवापौर्णमास्यांवाप्रारभ्यास्नानमाचरेत्॥ पुण्यान्यहानित्रिंशत्तुमकर
स्थेदिवाकरइति॥ सएवतुलामकरमेषेषुप्रातःस्नायीसदाभवेत्॥ हविष्यंब्रह्मचर्यंचमहापातक
नाशनमिति॥ स्नानकालउक्तोब्राह्मे॥ अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणः॥ माधवां
घ्रियुगंध्यायन्नयःस्नातिसुरपूजितइति॥ अरुणोदयमारभ्यप्रातःकालावधिप्रभो॥ माघस्नाना
वभांपुण्यांक्रमात्तत्रचधारणा॥ उत्तमंतुसनक्षत्रंलुप्ततारंतुमध्यमं॥ सवितर्युदितेभूपततोहीं

नंधकीर्त्तितमितिएवंसति॥संप्राप्तेमाघमासेतुतपस्विजनवल्लभे॥कोष्णानिसर्ववारीणिसमुष्णंतिभा
स्करे॥माघमासेरटंत्यापःकिंचिदभ्युदितेरवावित्यादिनारदीयादिवचनान्यत्रार्कविषयाणितथा
तत्रैव॥तडागेषुतुवास्नायात्कूपेभांडाश्रितेतथा॥माघमासेवरारोहेवाग्रत्वंवैनिम्नगाजलं॥भां
डाश्रितेत्वयंविशेषः॥सरित्तोयंमहावेगंनवकुंभस्थितंतथा॥वायुनाताडितंरात्रौगंगास्नानस
मंस्मृतं॥स्नातोवह्निंनसेवेतह्यस्नातोवाकथंचन॥सेवेतापितुहोमार्थंनत्वंगीतार्थंचन॥स्ना
नविधिमाहविष्णुः॥तत्रचोत्थायनियमंगृह्णीयाद्विधिपूर्वकं॥माघमासमिमंपूर्णंस्नास्येहं
देवमाधव॥तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसि॥ततःस्नात्वाभतीर्थेदत्वाग्निरसिवैम्य
हं॥वेदोक्तविधिनाराजन्सूर्यायार्घ्यंनिवेदयेत्॥पितॄणांतर्पयित्वातुअवतीर्यततोजलात्॥
वाग्यतश्चक्रधरंदेवंनामपूजयेत्॥वह्नौकृत्वाविधानेनततस्त्वेकाग्रमनोभवेत्॥भूशाय्याब्रह्म
चर्येणशक्तःस्नानंसमाचरेत्॥अशक्तस्यधनाढ्यस्यस्वेच्छासर्वत्रकथ्यते॥धनाढ्यस्यावऊध

नदानंकुर्वतः॥अवश्यमेवकर्त्तव्यंमाघस्नानमितिश्रुतिः॥तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलो
दकी॥तिलदस्तिलभोक्ताचषट्तिलीनावसीदति॥तैलमामलकाश्चैवतीर्थेदेयास्तुनिस्त्वरा
ः॥तथाप्रज्वालयेदग्निंसेवनार्थंद्विजन्मनां॥एवंस्नात्वावसानेतुभोज्यंदेयमवारितं॥भोजये
द्विजदांपत्यंभूषयेद्वस्त्रभूषणैः॥कंवलाजिनरत्नानिवासांसिविविधानिच॥चोलकानिच
देयानिप्रच्छादनपटानिच॥उपानहौतथागुप्तमोचकौपापमोचकौ॥अनेनविधिनादद्या
न्माधवःप्रीयतामिति॥सवित्रेप्रसवित्रेचपरंधामजलेमम॥त्वत्तेजसापरिभ्रष्टंपापंयातुस
हस्रधा॥दिवाकरजगन्नाथप्रभास्करनमोस्तुते॥परिपूर्णंकरिष्येहंमाघस्नानंतवाज्ञया॥
अयंसमापनमंत्रः॥अहन्यहनिदातव्यास्तिलाःशर्करयान्विताः॥माघावसानेसुभगेषु
द्रसंभोजनंतथा॥सूर्योमेप्रीयतांदेवोविष्णुमूर्त्तिर्निरंजनः॥दंपत्योर्वाससीसूक्ष्मसप्तधा
न्यसमन्विते॥त्रिंशत्तुमोदकादेयाःशर्करातिलसंयुताः॥भागत्रयंतिलानांतुचतुर्थःशर्क

रांशकः॥ अनभ्यंगीवरारोहेसर्वमासंनयेद्बुतीति॥ ॥इतिमाघस्नानविधिः॥ मकरसंक्रमेपरा
विंशतिघटिकाःपुण्याः॥ तथावृद्धवसिष्टः॥ अतीतानागतेपुण्येद्वेउदग्दक्षिणायने॥ त्रिंशत्कर्क
टकेनाड्योमकरेविंशतिःस्मृताइति॥ ब्रह्मवैवर्त्तेतुमकरेंतुदशाधिकाइतिपाठः॥ रात्रौमकरसं
क्रमेतुपरदिनेसूर्योदयेन्तरंपूर्वमहर्दलंपुण्यंतथाचभविष्योत्तरे॥ कार्मुकंतुपरित्यज्यझ श्र
षंसंक्रमतेरविः॥ प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेह्ननीति॥ वृद्धगार्ग्योपि॥ यदास्तमयवेलायां
मकरंयातिभास्करः॥ प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेह्ननीति॥ परेह्ननीत्युक्तोपिपूर्वार्द्धएव
आसन्नसंक्रमंपुण्यंदिनार्द्धस्नानदानयोरितिसामान्यवचनात्॥ अत्रकृत्यंशिवरहस्ये॥ तस्मात्कृ
ष्णतिलैःस्नानंकार्यंचोद्वर्त्तनंशुभैः॥ तिलादेयाश्वविप्रेभ्यःसर्वदैवोत्तरायणे॥ तिलतैलेनदी
पाश्चदेयाःशिवगृहेशुभाः॥ कालिकापुराणे॥ होमंतिलैःप्रकुर्वीतसर्वदैवोत्तरायणे॥ तन्मोदं शिव०
वायविप्रेभ्योहाटकेनसमंददेत्॥ उत्तरायणमासाद्यनरःकस्मात्तरोचतीतिपौष्यनंतरासु ५६

सप्तम्यष्टमीषुपूर्वेद्युरष्टकान्वष्टकाःकार्याः॥ माघकृष्णद्वादश्यांतिलद्वादशीव्रतं॥ ब्रह्मपुराणे॥ मा
घेतुकृष्णद्वादश्यांयमोहिभगवान्पुरा॥ तिलानुत्पादयामासतपःकृत्वासुदारुणम्॥ तिलपक्वम्यःतस्या
मुपोषितः॥ स्नातिस्तिलैस्तस्यांयजेद्धरिं॥ तिलतैलेनदीपाश्चदेयाःदेवगृहेषुच॥ निवेदयेत्तिलानेवहोत
व्याश्चतथातिलाः॥ तिलान्दत्वाचविप्रेभ्योभक्षयेच्चतथातिलानिति॥ माघकृष्णचतुर्दश्यांयमतर्प
णमाहहेमाद्रौयमः॥ अनर्काभ्युदितेकालेमाघकृष्णचतुर्दशी॥ स्नातसंतर्प्यसुयमंसर्वपापैःप्रमु श्र
च्यतइति॥ माघामायामर्द्धोदयोनामयोगविशेषोमदनरत्नेभारतेउक्तः॥ अमार्कपातश्रवणैर्युक्ता
चेत्पुष्यमाघयोः॥ अर्द्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमः॥ दिवैवयोगः॥ शस्तोयंनतुरात्रौकदा
चनेति॥ पुष्यमाघयोर्मध्यवर्त्तिनीअमापौष्यनंतराअमावास्येत्यर्थः॥ स्कांदे॥ माघामायांव्य
तीपातेआदित्येविष्णुदैवते॥ अर्द्धोदयंतदित्याहुःसहस्रार्कग्रहैःसममिति॥ तत्रैव॥ अर्द्धोदयेतु
संप्राप्तेसर्वंगंगासमंजलं॥ शुद्धात्मानोद्विजाःसर्वेभवेयुर्ब्रह्मसंमिताः॥ यत्किंचिद्दीयतेदानं

कृत्यर० तद्दानंमेरुतुल्यंभमिति ॥ अत्रदानविशेषोनिर्णयामृतेस्कांदे ॥ चतुःषष्टिपलंमुख्यमधमंतत्रकारये
५७ त् ॥ चत्वारिंशत्पलंवापिपंचविंशतिरेववेतिएतच्चकांस्यमयं ॥ एवंसुघटितंकृत्वाकांस्यभाजनमुत्तम न
मित्युक्तत्वात् ॥ तथा ॥ निधाययायसंतत्रपद्ममष्टदलंलिखेत् ॥ पद्मस्यकर्णिकायांतुकर्षमात्रंसुव
र्णकं ॥ तदभावेतदर्द्धवातदर्द्धंवापिधारयेत् ॥ भूमौतुतंडुलैःकृत्वाष्टदलमुत्तमं ॥ अन्यत्रंस्थापये
त्तत्रब्रह्मविष्णुशिवात्मकं ॥ तेषांपूजाततःकार्याश्वेतमाल्यैस्तुशोभनैः ॥ वस्त्रादिभिरलंकृत्यब्राह्म
णायनिवेदयेत् मंत्रः ॥ सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयं ॥ आपत्तेस्तारकंयस्मात्तद्गृहाणद्वि
जोत्तम ॥ तथासमुद्रमेखलांपृथ्वींसम्यग्दत्त्वाचयत्फलं ॥ तत्फलंलभतेमर्त्यःकृत्वेदंदानमुत्तम
मिति ॥ माघशुक्लचतुर्थ्यांढुंढिपूजोक्ताकाशीखंडे ॥ माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः ॥ शिव०
येत्वांढुंढेर्चयिष्यंतितेर्च्यास्युरसुरढुंढं निधायवार्षिकींयात्रांचतुर्थींप्राप्यतापसी ॥ शुक्लाशुक्ल ५७
तिलान्नवधाप्राश्नीयाद्धडुकान्नव्रती ॥ तीयात्रांनात्रयःकुर्यान्निवेद्यंतिललड्डुकैः ॥ उपसर्गसह

स्रैस्तुसहंतव्योममाज्ञया ॥ होमंतिलाज्यद्रव्येणयःकरिष्यतिभक्तितः ॥ तस्यांचतुर्थ्यांमंत्रज्ञस्तस्यमं
त्रःप्रसेत्स्यतीति ॥ कूर्मपुराणे ॥ माघशुक्लचतुर्थ्यांतुकुंदपुष्पैःसदाशिवं ॥ संपूज्ययोहिनक्ता
शीसप्राप्नोतिश्रियंनरइति ॥ माघशुक्लपंचम्यांरतिकामपूजोक्तापुराणसमुच्चये ॥ माघमा
सेसुरश्रेष्ठेशुक्लायांपंचमीतिथौ ॥ रतिकामौतुसंपूज्यकर्त्तव्यसुमहोत्सवः ॥ दानानिचप्रदे
यानितेनतुष्यतिमाधवइतिवाराहे ॥ माघशुक्लचतुर्थ्यांतुपरमाराध्यचश्रियः ॥ पंचम्यांकुं
दकुसुमैःपूजांकुर्यात्समन्वयइति ॥ माघशुक्लसप्तमीरथसप्तमीसंज्ञा ॥ अस्यामरुणोदयव्या
पिन्यांस्नानंकार्यमितिउक्तंस्मृतिसंग्रहे ॥ सूर्यग्रहणतुल्याहिशुक्लामाघस्यसप्तमी ॥ अरुणोदयवे
लायांस्नानंतत्रमहाफलं ॥ भविष्योत्तरे ॥ माघेमासिसितेपक्षेसप्तमीकोटिभास्करा ॥ कुर्यात्स्ना
नार्घ्यदानाभ्यामायुरारोग्यसंपदइति ॥ इदंचस्नानंतिप्पादिकंकीर्चसप्तार्कपत्राणिसप्तबद
रपत्राणीचशिरसिनिधायकर्त्तव्यं ॥ शिष्टसमाचारात् ॥ तत्रमंत्रः ॥ यद्यज्जन्मकृतंपापंमया

कृत्यर०
५८

सप्तसुजन्मसु॥ तन्मेरोगंचशोकंचमाकरीहंतुसप्तमीति॥ अर्घ्यदानमंत्रः॥ सप्तसप्तिवहप्रीतसप्त
लोकप्रदीपन॥ सप्तम्यासहितोदेवगृहाणार्घ्यंदिवाकरेति॥ ततःप्रार्थना॥ जननीसर्वलोकानांस
प्तमीसप्तसप्तिके॥ सप्तम्याहतिकेदेवि नमस्तेसूर्यमंडल इति॥ इयंप्रयागेअतिप्रशस्ता॥ अ
रुणोदयवेलायांशुक्लामाघस्यसप्तमी॥ प्रयागेयदिलभ्येतकोटिसूर्यग्रहैःसमेवचनात्॥ अ
स्यामेवभविष्योत्तरोक्तः॥ स्नानविधिः॥ अरुंधतीप्रतिवसिष्ठवचः॥ माघस्यसितसप्तम्यां
सर्वकामफलप्रदं॥ रूपसौभाग्यजननंस्नानंकुरुवरानने॥ हलाक्षस्यामेकभक्तंसप्तम्यांनि
श्चलंजलं॥ रात्र्यंतेचालयेथास्त्वंदत्वाशिरसिदीपकं॥ नकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत्
॥ सौवर्णेराजतेपात्रेताम्रेवाप्यलाबुमयेथवा॥ तैललनवह्निदातव्यामहारजनरंजिता॥ समाहि
तमनाभूत्वादत्वाशिरसिदीपकं॥ भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत्॥ नमस्तेरुद्ररू व्रिव० ५८
रि पायरसानांपतयेनमः॥ वरुणायनमस्तेस्तुहरिवासनमोस्तुते॥ जलोपरितरद्दीपःस्नात्वा

संतर्प्यदेवताः॥ चंदनेनलिखेत्पद्ममष्टपत्रंसकर्णिकं॥ मध्येशिवंसपत्नीकंप्रणवेनचसंयुतं॥
शक्रेदलेरविंजयेद्बुधः॥ पश्चिमेसवितापूज्यःपूज्योर्कश्चानिलेदले॥ सौम्येसहस्रकिरणःशैवेसर्वा
त्मनेनमः॥ +विःपूज्येभानुश्चैवानलेतथा॥ याम्येविवस्वान्नैर्ऋत्येभास्करंच+पूज्याःप्रणवपू
र्वकंनमस्कारांतयोजिताः॥ पुष्पैःसुगंधधूपैश्चपृथक्केनयुधिष्ठिर॥ विसर्ज्यवस्त्रसंवीतंस्व
स्थानंगम्यतामिति॥ ततोगृहेगत्वाताम्रपात्रेयथाशक्त्यामृन्मयेथवाभक्तिमान॥ स्थापयेत्
तिलपिष्टंचसघृतंसगुडंतथा॥ कांचनंतालकंकृत्वाअशक्तस्तिलपिष्टजं॥ संछाद्यरक्तव
स्त्रेणपुष्पैर्धूपैरथार्चयेत्॥ ततसंवाचयेद्विप्रैर्दद्यात्मंत्रेणतालकं॥ मंत्रः॥ आदित्यस्यप्रसा
देनप्रातस्नानफलेनच॥ दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकं॥ तालकंकर्णाभरणंपूज
यित्वोपदेष्टारंविप्रानन्यांश्चपूजयेत्॥ ततःनक्तंपाषंड्यादिभिरालापादीन्वर्जयन्सूर्यध्या
यन्दिनमतिवाहयेत्॥ ततःनक्तंभुंजीतव्रनरोदीजान्नंभोज्यशक्तितशति॥ इयंमन्वादिःश्रुत्

पक्षस्थत्वाकुतपपूर्वार्द्धव्यापिनीग्राह्या॥ माघशुक्लाष्टम्यांभीष्मतर्पणादिकार्यं॥ तदुक्तंपाद्मे॥ मा
घेमासिसिताष्टम्यांसतिलंभीष्मतर्पणं॥ श्राद्धंचैवसदाकुर्युस्तेस्युःसंततिभागिनइति॥ अत्रश्रा
द्धंकाम्यं॥ तर्पणंकाम्यंनित्यंच॥ ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलं॥ संवत्सरकृतंतेषांपु
ण्यंनश्यतिसत्तमेतिमदनरत्नधृतवचनात्॥ इदंचजीवत्पितृकेणापिकार्यंजीवत्पितापिकुर्वी
ततर्पणंयमभीष्मयोरितिवचनात्॥ तर्पणमंत्रश्च॥ भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रि
यः॥ आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियां॥ वैयासपद्यगोत्रायसांकृतिप्रवरायच॥ अपु
त्रायददाम्येतज्जलंभीष्मायवर्मणइति॥ माघशुक्लैकादशीभीमद्वादशीसंज्ञा॥ तदुक्तंपाद्मेत
यात्वतस्मिंद्वीरतवनाम्नाभविष्यति॥ साभीमद्वादशीह्येषासर्वपापहराशुभेति॥ द्वादशीए
कादशी॥ एकादश्यांनिराहारःसमभ्यर्च्यचकेशवमितिसंकल्पमंत्रलिंगात्॥ इयंपरविद्धा
ग्राह्या॥ रुद्रेणद्वादशीयुक्तेतियुग्मवाक्यात्॥ माघ्यांकृत्यविशेषोभविष्योत्तरे॥ वैशाखीकार्त्ति

कीमाघीतिथयोतीवपूजिताः॥ स्नानदानविहीनास्तानेयाःपांडुनंदनेति॥ तत्रैव॥ माघ्यांस्नानंत
थासम्यक्संतर्प्यपितृदेवताः॥ तिलपात्राणिदेयानितिलाःसपलवोदनाः॥ कार्यसदानमंत्रै
वधेनुदानंप्रशस्यते॥ कंबलाजिनरत्नानिमोचकोपायमाचको॥ उपानद्दानमत्रैवतुल्यमस्वर
येनतु॥ यत्रवातत्रवास्नानंदानंचित्तानुसारतः॥ कालकालोद्भवंसर्वंशस्यतेपांडुनंदन॥ तथा
॥ नकेवलंब्राह्मणानांदानमत्रप्रशस्यते॥ भगिनीभागधेयानांमातुलानांपितृष्वसः॥ दरि
द्राणांचबंधूनांदानंकोटिगुणोत्तरमिति॥ इयमेवयोगविशेषेणमहामाघी॥ तथाचगार्ग्य
ः॥ मेषराशौयदासौरिःसिंहेचंद्रबृहस्पती॥ भास्करःश्रवणर्क्षेचमहामाघीतिसास्मृता॥ सौ
रिःशनैश्चरः॥ इयंप्रयोगेतिप्रशस्ता॥ महामाघीप्रयागेतुनैमिषेफाल्गुनीतथा॥ श्राग
लयामेमहाचैत्रीकृतापुंसांमहाफलेतिगार्ग्यवचनात्॥ माघ्यनंतराष्टमीअष्टकाहेमंत
शिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्याश्वलायनसूत्रात्॥ अमांतमासेन

माघकृष्णचतुर्दश्यांशिवरात्रिः॥ शिवरहस्ये॥ तत्त्वभ्रत्वथदेववर्षेमाघकृष्णचतुर्दशी॥ शिवरात्रि
ःसमाख्याताशियेयंत्रिपुरद्विषइति॥ स्कांदेपि॥ माघफाल्गुनयोर्मध्येअसितायाचतुर्दशी॥
शिवरात्रिस्तुसाख्यातासर्वयज्ञोत्तमोत्तमेति॥ शिवरात्रिव्रतेचोपवासपूजाजागरणारूपप्र
धानत्रयसमुदायरूपं॥ उपवासप्रभावेनबलादपिचजागरात्॥ शिवरात्रेस्तथातस्यांलिंग
स्यापिचपूजया॥ अक्षयान्लभतेभोगांछिवसायुज्यमाप्नुयादितिनागरखंडेत्रयाणामपिफल
संवधात्॥ क्वचिदुपवासमात्रश्रवणंतितरयोरुपलक्षणं॥ कचित्तुअशक्तंप्रत्यनुकल्पत्वेनैक
स्यद्वयोर्वाश्रवणं॥ अथवाशिवरात्रिंचपूजाजागरणेनयेत्॥ कश्चित्पुण्यविशेषेणव्रतहीनोपि
यःपुमान्॥ जागरंकुरुतेतत्रससरुद्रसमतांव्रजेदित्यादिषुअथवाशिवाद्युश्रवणात्॥ अत्रा
पिजन्माष्टमीवद्रात्रावपित्रयोदशीवेधोभवति॥ रात्रिसाध्यव्रतत्वात्॥ तदुक्तंस्कांदे॥ निशिभ्र
मंतिभूतानिशक्तयःशूलभृद्यतः॥ अतस्तस्यांचतुर्दश्यांसत्यांतत्पूजनंभवेदिति॥ नागरखं

डेपि॥ तस्माद्रात्रौहिमेपूजांयःकरिष्यतिमानवइति॥ तत्रार्धरात्राहूर्ध्वमप्यनुवर्त्तमानयात्रयोदश्या
युक्ताचतुर्दशीपरेद्युर्निशीथायोगिन्यपिपरैव॥ माघासितेभूतदिनंहिराजन्नुपैतियोगंयदिपंचदश्या
॥ जयाप्रयुक्तांनतुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्येतिहेमाद्रावायुदाहृतवचनात्॥ जयात्र
योदश्याप्रकर्षेणयुक्तामित्युक्तत्वात्पूर्वेद्युस्त्रयोदश्यावहुरात्रिव्याप्तिप्रतीतिः॥ यातुपूर्वेद्युरेवनि
शीथयोगिनीदिनद्वयेपिवानिशीथयोगिनीसापूर्वैव॥ तदुक्तंस्कांदे॥ कृष्णाष्टमीस्कंदषष्ठीशिव
रात्रिचतुर्दशी॥ एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत्॥ तथा॥ जयंतीशिवरात्रिश्चकार्याभ
द्रजयान्विते॥ तथा॥ माघफाल्गुनयोर्मध्येयास्याच्छिवचतुर्दशी॥ अनंगेनसमायुक्ताकर्तव्या
सासदातिथिरिति॥ ननुपूर्वेद्युरेवनिशीथयोगिनीकालयोगात्पूर्वलिखितवचनेभ्यश्चपूर्वैवे
तियुक्तं॥ दिनद्वयेतद्योगिनीतुपरेद्युः॥ प्रदोषनिशीथोभयव्याप्तिलाभात्संकल्पकालमारभ्य
सत्वादहोरात्रोभययोगाच्चपरैवयुक्तानपूर्वा॥ अतएवमाधवेनापिदिनद्वयनिशीथव्यापिनी

पूर्वैवग्राह्येत्युक्तं॥ तिथितत्वेप्येवमेव॥ तत्कथंपूर्वैवेत्युच्यतइतिचेत्‌॥ उच्यते॥ अर्द्धरात्रात्पुरस्तात्त्वे
ज्जयायोगोयदाभवेत्‌॥ पूर्वविद्धैवकर्त्तव्याशिवरात्रिःशिवप्रियैरितिपद्मपुराणेवचनमीदृशएववि
षयेपूर्वविद्धाविधानार्थं॥ अंततःसर्वाण्यपिपूर्वविद्धाविधायकानिप्रागुक्तानिवाक्यानिमहतामपि
पापानांदृष्टावैनिःकृतिःपुरा॥ नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंत्विमामितिस्कंदपुराणीयोग
वाक्यानिषिधश्चैतादृशविषयएवसार्थकः॥ पूर्वस्याएवनिशीथयोगेपूर्वाग्रहणस्यवचनांतरेणै
वसिद्धत्वात्‌॥ तथाचनारदोपि॥ माघकृष्णचतुर्दश्यामादिदेवोमहानिशि॥ शिवलिंगतयोद्भू
तःकोटिसूर्यसमप्रभः॥ तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथिः॥ तथा॥ पूर्वेद्युरपरेद्युर्वा
महानिशिचतुर्दशी॥ व्याप्तासादृश्यतेयस्यांतस्यांकुर्याद्व्रतंनरइति॥ एवंसतितत्रपूर्वोक्तवच
नामानर्थक्यात्तुल्यान्निदिनद्वयनिशीथव्यापिन्याःपूर्वस्याग्राह्यत्वंप्रतिपादयंति॥ किंचअर्द्धरा
त्रात्पुरस्ताचेदितिवचनेपूर्वविद्धैवेत्येवकाराउत्तरविद्धानिवर्त्ती॥ काउत्तरविद्धायाःप्रसक्तिर्गम्य

ते॥ साचोभयत्रनिशीथयोगएवसंभवतिनतुपूर्वत्रैवनिशीथयोगे॥ तस्मादुभयत्रनिशीथयोगेऽ
पिनपूर्वैवेति॥ वक्तुंस्कंदपुराणेआदौमार्गशिरेमासिदीपोत्सवदिनेपिवा॥ गृह्णीयान्माघमासेवा
घादशैवमुपोष्येदित्यादिवचनैःप्रतिमासकृष्णचतुर्दशीषुपूजोपवासजागरणात्मकंकाम्यंशि
वरात्रिव्रतंविहितंतस्यापिरात्रौप्रतिमासंपूजायाजागरणस्यचविधानात्सकलरात्रिसाध्यत्वाद्बहुरा
त्रिव्यापिनीतत्रग्राह्या॥ दिनद्वयेरात्रिव्याप्तिसाम्येपूर्वा॥ रुद्रव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिरि
तिव्रतखंडेवर्द्धतीति॥ येषांप्रदोषव्याप्तिरपिनिर्णायिकातेषांमतेउत्तरेति॥ स्कंदपुराणे॥ माघकृष्णचतु
र्दश्यांरविवारोयदाभवेत्‌॥ भौमोवाथभवेद्देविकर्त्तव्यंव्रतमुत्तमं॥ शिवयोगस्ययोगेचतद्भवेदुत्तमो
त्तममिति॥ तथा॥ त्रयोदशीकलाप्येकामध्येचैवचतुर्दशी॥ अंतेचैवसिनीवालीत्रिस्पृशांशिवम
र्चयेदिति॥ पारणंचदातस्याःस्कंदपुराणएवतिथ्यंतेतिथिमध्येचविहितं॥ कृष्णाष्टमीस्कंदषष्ठीशि
वरात्रिचतुर्दशी॥ एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति उपोषणंचतुर्दश्यांचतुर्दश्यांच

तुर्दश्यांचपारणं॥कृतैःसुकृतलक्षैश्चलभ्यतेवापवानवेति॥तत्रसात्वस्तमयपर्यंतव्यापिनी
चेत्परेद्युनि॥दिवैवपारणंकुर्यात्पारणान्नास्तिदोषभागितिशिवरात्रिप्रकरणपठितकालादर्शा
दिलिखितंवचनात्तिथ्यंतंप्रतीक्ष्यदिवापारणस्यकर्तुरशक्तावेतितिथ्यंतेनोचेत्तिथिमध्यएवेतिव्य
वस्था॥अयमत्रसंक्षेपतःशिवरात्रिव्रतानुष्ठानप्रकारः॥विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमा
लया॥पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः॥तस्मान्मृदापिकर्तव्यंललाटेतुत्रिपुंड्रकमिति
लैंगात्कृतत्रिपुंड्ररुद्राक्षस्तिथ्याद्युल्लिख्यशिवप्राप्तिकामःशिवरात्रिव्रतंह्येतत्करिष्येहंमहा
फलं॥निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते॥चतुर्दश्यांनिराहारोभूत्वाशंभोपरेद्युनि॥भोक्ष्येहं
भुक्तिमुक्त्यर्थंशरणंमेभवेश्वरेतिपठित्वाजलमुत्सृजेत्॥ततोनित्यकृत्यंविधायरात्रौप्रथमप्रह
रेअद्यशिवपूजांकरिष्यइतिसंकल्प्यपूर्वप्रतिष्ठितेलिंगेअप्रतिष्ठितेअथवातत्रैवप्राणप्रतिष्ठां
कृत्वापार्थिवलिंगपूजाप्रकारेणपंचाक्षरेणमंत्रेणवैदिकेनवापौराणमंत्रेर्वाप्रणवादिचतुर्थ्य

नमोंतशिवनाम्नावाआवाहनाद्युपचारैःपूजयेत्॥तत्रविशेषः॥ॐह्रौंईशानायनमइतिप्रथमप्र
हरेदुग्धेनस्नपनंशिवरात्रिव्रतंदेवपूजाजपपरायणः॥करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वरेत्यर्घ्य
दानंच॥ततस्तन्मंत्रजपेनतत्कथाश्रवणादिभिर्वाजागरणं॥तथानंतज्जपःस्नानंतत्कथाश्रवणा
दिकं॥उपवासकृतांह्येतेगुणाःप्रोक्तामनीषिभिरितिवचनात्॥द्वितीयप्रहरेॐह्रौंअघोरायनमइ
तिदध्नास्नपनं॥नमःशिवायशांतायसर्वपापहरायच॥शिवरात्रौददाम्यर्घ्यंप्रसीदउमयासहेतिचा
र्घ्यदानं॥तृतीयेप्रहरेॐह्रौंवामदेवायनमइतिघृतेनस्नपनं॥दुःखदारिद्र्यशोकेनदग्धोहंपार्वती
पते॥शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमेइत्यर्घ्यदानं॥चतुर्थेॐसद्योजातायनमइतिमधुना
स्नपनं॥मयाकृतान्यनेकानिपापानिहरशंकर॥शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमेइत्यर्घ्यदा
नं॥एवंमूलमंत्रजपादिनारात्रिमतिवाह्यप्रभाते॥अविघ्नेनव्रतंदेवत्वत्प्रसादात्समापितं॥क्ष
मस्वजगतांनाथत्रैलोक्याधिपतेहर॥यन्मयाद्यकृतंपुण्यंतद्रुद्रस्यनिवेदितं॥त्वत्प्रसादान्महा

कृत्यर० देवव्रतमद्यसमर्पितं॥ प्रसन्नोभवमेश्रीमन्सद्गतिःप्रतिपाद्यतां॥ त्वदालोकनमात्रेणपवित्रोस्मिनसं
६३ शयइतिव्रतंसमर्पयेत्॥ परदिनेयथाशक्तिब्राह्मणान्भोजयित्वासंसारक्लेशदग्धस्यव्रतेनानेनशं
करः॥ प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभवेतिप्रार्थ्यबंधुभिःसहपारणंकुर्यादिति॥ इदंचव्रतंनि
त्यं॥ वर्षेवर्षेमहादेविनरोनारीपतिव्रता॥ शिवरात्रौमहादेवंकामंभक्त्याप्रपूजयेदितिस्कांदेवर्षे
वर्षेइतिवीप्साश्रवणात्॥ परात्परतरंनास्तिशिवरात्रिव्रतात्परं॥ नपूजयेतिभक्त्येशंरुद्रंत्रिभुवने
श्वरं॥ जंतुर्जन्मसहस्रेणभ्रमेन्नात्रसंशयइतितत्रैवाकरणेदोषश्रवणाच्च॥ काम्यंच॥ शिवंच
पूजयित्वायोजागर्त्तिचचतुर्दशीं॥ मातुःपयोधरंसनपिबेत्सकदाचन॥ ममभक्त्यातुयोदेविशिवरा
त्रिमुपोषकः॥ गणाश्चमक्षयंदिव्यमक्षयंशिवशासनं॥ सर्वान्भुक्त्वामहाभोगांस्ततोमोक्षमवाप्नु
यादितितत्रैवफलश्रवणात्॥ अत्रचचंडालपर्यंतानामधिकारः॥ शिवरात्रिव्रतंनामसर्वपाप शिव०
प्रणाशनं॥ आचांडालमनुष्याणांभुक्तिमुक्तिप्रदायक॥ मितीईशानसंहितावचनात्॥ ॥ ६३

इतिशिवरात्रिनिर्णयः॥ ॥एतदुत्तरामावास्यायुगादिः दर्शेतुमाघमासस्यप्रवृत्तंद्वापरंयुगमिति
स्कांदात्॥ अमावास्यायांमाघस्येतिमत्स्यपुराणाच्च॥ ब्रह्मवैवर्तेतुमाघीपौर्णमासीयुगादिरित्युक्तं
॥माघेचपौर्णमास्यांतुघोरंकलियुगंतथेति॥ विष्णुपुराणे॥ माघासितेपंचदशीकदाचिदुपैतियो
गंयदिवारुणेन॥ ऋक्षेणकालःसपरःपितॄणांनह्यल्पपुण्यैर्नृपलभ्यतेसावितिवारुणंशततारका
महाभारते॥ कालेधनिष्ठायदिनामतस्मिन्भवेत्तुभूपालतदापितृभ्यः॥ दत्तंतिलान्नंप्रददाति
तृप्तिंवर्षायुतंतत्कुलजैर्मनुष्यैरिति॥ फाल्गुनपौर्णमास्यांहोलिकोत्सवः॥ भविष्योत्तरे॥ अद्य
पंचदशीशुक्लाफाल्गुनस्यनराधिपेलुकम्पतथाहर्षंकिलालोकारमंतुचहसंतुचादारुजानि
चखड्गानिगृहीत्वासमरोत्सुकाः॥ योधाइवविनिर्यंतुशिशवःसंप्रहर्षिताः॥ संचयंशुष्ककाष्ठानांउप
लानांचकारयेत्॥ तत्राग्निंविधिवद्धुत्वाराक्षोघ्नैर्मंत्रविस्तरैः॥ ततःकिलकिलाशब्दैस्तालीशब्दैर्म
नोहरैः॥ तमग्निंत्रिःपरिक्रम्यगायंतुचहसंतुच॥ जल्पंतुस्वेच्छयालोकानिःशंकायस्ययन्मतं॥

कृत्यर॰ भर्गं बहुविधैः शब्दैः कीर्त्तयेद्देशभाषया॥ विस्तारयंश्च गायंश्च सस्तं नाम तस्यै वै सर्वदुष्टापहो होमः स
६४ र्वरोगोपशांतिदः॥ क्रियते स्यां द्विजैः पार्थ तेन सा होलिका स्मृता॥ अस्यां निशागमे पार्थ संरक्ष्याः
शिशवो गृहे॥ गोमयेनोपलिप्ते च सचतुष्के गृहांगणे॥ आकारयेच्छिशुप्रायान् खड्गव्यग्रकरान्
रान्॥ ते काष्ठखड्गैः संस्पृश्य गीतैर्हास्यकरैः शिशून्॥ रक्षंति तेषां दातव्यं गुडं पक्वान्नमेव च॥
होलिकापूजामंत्र आधुनिकनिबंधेषु॥ असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः॥ अतस्त्वां पूज
यिष्यामि भूते भूतिप्रदा भवेति॥ एतदुत्तरप्रतिपदि॥ कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवता
ः॥ वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये॥ मंत्रेणानेन राजेंद्र पद्ममानं निबोध मे॥ वंदितासि सु
रेंद्रेण ब्रह्मणा शंकरेण च॥ अतस्त्वं पाहि नो देवि विभूते दा भवेति॥ होलिकादीपनं च प्रदोषे का
र्यं॥ तथा च पृथ्वीचंद्रोदये दुर्वाससो वचनं॥ निशागमे तु पूज्येत होलिका सर्वतोमुखैरिति॥ त शिव॰
त्र भद्रायां सत्यां न कर्त्तव्यं॥ भद्रायां दीपिता होला राष्ट्रभंगं करोति वै॥ नगरस्य च नैवेष्टा त ६४

स्मात्तां परिवर्जयेत् इति पुराणसमुच्चयात्॥ तत्र पूर्वस्यां प्रदोषे भद्राया असत्त्वे तत्रैव कार्यं॥ य
दा तु तत्र भद्रा भवति तदा अस्तपंचभवेत्स्यात्ःशेषः सूर्योदयः स्मृत इति परिभाषितसूर्योदया
त्पूर्वं भद्रांतं प्रतीक्ष्य होलिकादीपनाय यदि कश्चित्कालो लभ्यते न दीप्रदोषातिक्रमेण तत्रैव क
र्त्तव्यं राकायाम द्वयाह्नेह्नि चतुर्दश्यापायदा भवेत्॥ होलां भद्रावसाने तु निशीथांते पि दीपयेदिति भ
विष्योत्तरात्॥ यदा तु पूर्वदिने भद्रारहितः कालो न लभ्यते उत्तरदिने च सूर्योस्तात्पूर्वमेव पूर्णि
मासमाप्तात् तदा भद्रापुच्छे कार्यं॥ पृथिव्यां यानि कार्याणि शुभानि लभ्यानि च॥ तानि सर्वाणि
सिध्यंति विष्टिपुच्छे न संशय इति लल्लवचनात्॥ अस्मिन्नेव विषये दा उत्तरा पौर्णमासी सार्द्धय
मत्रयपरिमिता अधिका वा प्रतिपच्चोत्तरदिने वृद्धिगामिनी तदा पौर्णमास्युत्तरप्रतिपत्प्र
दोष एव कार्यं न तु पूर्वरात्रौ विष्टिपुच्छे॥ तथा च भविष्योत्तरे॥ सार्द्धयामत्रयं पूर्णा द्वितीये दिवसे
यदा॥ प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृतेति॥ एवं सति योत्तरदिने पि कृत्स्नप्रदोषे

कृत्यर॰
६५

तदेकदेशेनोवाचरन्तिसाउत्तरामुत्तरा॥ पूर्वोक्तंतुपूर्वविद्धायाह्यलंमुत्तरत्रप्रदोषास्पर्शेहेतुश्चभा
वेचरुतेयं॥ ननुयदापूर्वरात्रि॥ सर्वाभद्राव्याप्ताउत्तरदिनप्रदोषेश्चचंद्रग्रहणाक्रांतस्तदास
र्वेषामेववर्णानांसूतकंराहुदर्शनइत्यशुचित्वात्कथंहै तत्रहोलिकादीपनं॥ उच्यते॥
स्नात्वाकर्माणिकुर्वीतशृतमन्नंविवर्जयेदितिवचनात्स्नानोत्तरंनित्यनैमित्तिकेषुधि
कारित्वातादिति॥ अत्रैवकृत्यविशेषः कृत्यचिंतामणौब्राह्मे॥ नरोदोलागतंदृष्ट्वागोविं
दंपुरुषोत्तमं॥ फाल्गुन्यांसंयतोभूत्वागोविंदस्यपुरंव्रजेत्॥ इयंमन्वादिरपिनिर्णय॥
स्कएवएतदुत्तरप्रतिपदिकृत्यविशेषोभविष्योत्तरे॥ प्रवृत्तेमाधवेमासिप्रतिपद्युदिते
रवावित्युपक्रम्य॥ मंत्रितेचर्चितेचैवजपलिप्तेगृहाजिरे॥ चतुष्कंकारयेच्छ्रेष्ठंवर्णकैश्चाक्ष
तैश्शुभैः॥ तन्मध्येस्थापयेत्पीठंशुक्लवस्त्रोत्तरच्छदं॥ अग्रतःपूर्णकलशंस्थापयेत्सदलं
युतं॥ साक्षतंसहिरण्यंचसितचंदनचर्चितं॥ आसनेचोपविष्टस्यब्रह्मघोषेणभारत॥

शिव॰
६५

चर्चयेच्चंदनेनारीअव्यंगांगाशुभलक्षणा॥ परागोत्तरपदीश्रेष्ठांशुकविभूषिता॥ वसुधारांनि
रोतंचदधिदूर्वाक्षतान्वितं॥ नर्दापयित्वाश्रीखंडमायुरारोग्यवृद्धये॥ वसुधारामितिपादादा
रभ्यमूर्धानंचंदनेनचर्चयेदित्यर्थः॥ तच्चंदनंवर्द्धापयित्वाकिंचिदवशेषंशेष्य॥ पश्चाच्चप्राशये
द्विद्वान्चूतपुष्पंसचंदनं॥ मनोभवस्यसापूजाऋषिभिःसंप्रदर्शिता॥ प्राशनेमंत्रश्चाहृ
तमग्र्यंवसंतस्यमाकंदकुसुमंतव॥ सचंदनंपिबाम्यद्यसर्वकामसमृद्धये॥ अनंतरंद्विजे
भ्राणांसूतमागधवंदिनां॥ दद्याद्दानंयथाशक्त्याकामोमेप्रीयतामिति॥ ततोभोजनवेलायां
श्रुतंपाकंनरोनहि॥ प्राशयेत्प्रथमंचान्नंततोभुंजीतकामतः॥ यएवंकुरुतेपार्थशास्त्रो
क्तंफाल्गुनोत्सवं॥ अनायासेनसिध्यंतितस्यसर्वेमनोरथाइति॥ अस्यामेवविशेषःपद्मपु
राणे॥ चैत्रेमासिमहाबाहोपुण्याप्रतिपदापरा॥ तस्यांयःश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः
॥नतस्यदुरितंकिंचिन्नाधयोव्याधयोनृप॥ भवंतिकुरुशार्दूलतस्मात्स्नानंसमाचरेत्॥

दीपनीराजनंतद्धिसर्वरोगविनाशनं॥गोमहिष्यादियत्किंचित्तत्सर्वंभूषयेन्नृप॥नीलवस्त्रादि
भिःसर्वास्तोरणाधस्ततोनयेत्॥ब्राह्मणान्ततोभोज्यंकुर्यात्कुरुकुलोद्वहेति॥अत्रप्रतिपद्यौ
दयिकीग्राह्या॥यत्तत्रेमधुमासेतुप्रतिपद्युदितेनवावितिभविष्योत्तरादितिकेचित्॥होलिका
दीपनाव्यवहितोत्तरादिनंग्राह्यमितितुयुक्तं॥अतएवदृढवसिष्ठेनपूर्वापिविहितावत्सरादौ
वसंतादौबलिराज्येतथैवच॥पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरिति॥अत्रतैलाभ्यंगोनि
त्यः॥वत्सरादौवसंतादौबलिराज्येतथैवच॥तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइतिवृ
द्धवसिष्ठवचनात्॥पूर्णिमांतचैत्रकृष्णत्रयोदशीशतभिषायुतावारुणीतत्रगंगास्नानंम
हाफलं॥तदुक्तंस्कांदे॥वारुणेनसमायुक्तामधौकृष्णात्रयोदशी॥गंगायांयदिलभ्येतसूर्य
ग्रहशतैःसमेति॥इयमेवशनिवारयोगेमहावारुणीशुभयोगयोगेमहामहावारुणीमहा
चातथाचतत्रैव॥शनिवारसमायुक्तासामहावारुणीस्मृता॥गंगायांयदिलभ्येतकोटिसू

र्यग्रहैःसमा॥शुभयोगसमायुक्ताशनौशतभिषायदि॥महामहेतिविख्याताकोटिकुलमुद्ध
रेदिति॥फाल्गुनामावास्योमन्वादिः॥फाल्गुनस्यामावास्येतिमात्स्यात्॥साचपराह्णिकीग्रा
ह्याकृष्णपक्षगतत्वादितिशिवं॥भूतश्रुत्यृषिचंद्रमितेब्देमाघकृष्णमहेशेरविवारे॥ग्रंथ
पूर्तिमकरोत्किलरामःश्रिरमायातिसमर्पणबुध्या॥तत्सदाशिवसुतोयोरामचंद्रेतिविश्रुत
ःतिनेयंनिर्मितासम्यक्कृत्यरत्नावलीशुभा॥अनयाप्रीयतांलक्ष्मीनृसिंहोभक्तवत्सल
ःकुलदेवतमित्येतत्तदर्पणंस्यात्शुभामतिः॥ ॥इतिश्रीमद्वेदतदर्थाभिज्ञतत्सदाल
क्ष्मभट्टसुतविठ्ठलभट्टसूरिसुतभट्टरामचंद्रविरचिताकृत्यरत्नावलीसमाप्ता॥
॥ ॥शुभंभवतु॥ ॥श्रीकल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥ ॥
॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥ ॥

रूसरत्नावळी त्र्यबकलाजिनाआत्मारायदत्तावटपत्तने

६७८